M-1944

दाखल क्र. M 1944 विषय धर्मशास्त्र

नाव. प्रेतकाशी

लेखक/लिपीकार ४

पृष्ठ 50 काळ — पूर्ण/अपूर्ण

M-1944

M-1944

श्रीगणेशाय नमः॥ नत्वा गौरीशं शंभुं सुरं विबुधगुणयुतं भैरवं भूतन
नाथं प्रेतानां नतसत्कृतेष्टं सनि गिरिजया शंकरो यत्र भूमौ॥ कुर्वे
हं प्रेत काशी निखिलमुनिमतं चावलोक्य वसम्यक् कृत्वालोकोप
नामाप्तेन विधिविहितां शुद्धिं संचेय नाथः॥१॥ अनेनैवावदास
न्ने मरणानां प्रायश्चित्तमुच्यते॥ सर्वस्वस्थावस्थायामेव प्राय
श्चित्तं कुर्यात्॥ तदुक्तं विधानपारिजाते॥ ध्यात्वा तं चैव विप्रेभ्यो प्राप्त
स्नात्वा विधानेन ततः आत्मशुद्धिं ततः कुर्यात् सर्वपापप्रणाशिनीं॥ ब्रह्महत्या
दिपापेषु लिप्तायेसर्वदा जनाः तेषां न त्याप शांत्यर्थं प्रायश्चित्तमिहो
च्यते॥ तीर्थं गत्वा ब्राह्मणानाहूय कृतस्नानादिवा सासः ब्राह्मणान्

नराधिप

स्व

अमावास्यानिर्णयश्लोकः॥ दर्शो यत्रापराह्णं स्पृशति स दिवसः श्रा-
द्धकालो द्वयोश्चेद्व्याप्तावल्पो यदासौ यदि भवति समः क्षिप्यमाणो नु पूर्वः॥
दृष्टोसास्येप्यनग्नेर्युवतिरपलयोश्चश्च वर एवाहिताग्ने दर्शो न चापराह्णं
स्पृशति कुतुपसंस्पर्शितोयं विधिस्यात्॥१॥ श्राद्धनिर्णये॥ सायं तृत्व
परत्र चेन्मृततिथिः सैवाब्दिके मासि सा गण्याद्यपराह्णयोर्यदि त-
दायत्राधिका सा मता तुल्या चेदुभयापराह्णसमये पूर्वा न चेत्तद्द्व-
योः पूर्वैर्वित्रिमुहूर्तगास्तत्समये नोचेत्परैवोचिता॥२॥

प्रदक्षिणीकृत्य अथ साष्टांगं प्रणमेत्॥ नत्वा पर्षदाग्रे गोदयोप्रसेवं
प्रत्याम्नायत्वेन यथाशक्ति स्वर्णरोप्ययोर्निष्कं दत्वा तदर्धं वा निधाय
मम जन्मप्रभृति मरणपर्यन्तं ज्ञानाज्ञानेन सकृदसकृत् कायिकवाचि-
कमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपा-
तकोपपातकातिपातकलघुपातकसंकलीकरणमलिनीकरणअ-
पात्रीकरणजातिभ्रंशकरणप्रकीर्णकादिकनानापातककारिणां विना-
शार्थं प्रायश्चित्तमुद्दिश्य ममानुग्रहं कुर्वन्तु भवन्तः इत्युक्त्वा पुनः प्रणमेत्॥
अथ प्रार्थना॥ सर्वधर्मविवेक्तारो गोप्तारः सकला द्विजाः॥ मम देहस्य सं-
शुद्धिं कुर्वन्तु द्विजसत्तमाः॥ मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषं॥
प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ॥ ततस्ते सभ्याः शरीरद्रव्यादि

रात्रिमुहूर्तमध्यमादिपक्षांश्च विचार्य अस्मिन्पक्षेऽयं शास्त्र इति निश्चित्य सभानुवा
कपुस्तकवाचनपूर्वकं कथयेयुः ॥ स च पुस्तकपूजां गंधपुष्पादिभिर्विधाय सभ्य
रजां च ॥ कृतांजलिपुटोऽयं तान्पदिष्टः प्रणोमनु ॥ सभ्याश्च षडब्दं त्र्यब्दं साधं
वाब्दं चांद्रायणद्वयं कृच्छ्रांद्रायणेषु कांचन पक्षं शास्त्रानुसारेणादिशेयुः ॥ तथा
च मितीक्षरायां ॥ जन्मप्रभृति पापानि बहूनि विविधानि च ॥ कृत्वा वा ब्रह्महत्या
याः षडब्दं व्रतमाचरेत् ॥ इति विधानपारिजातेऽपि ॥ पंचाब्दं चतुराब्दं वा त्र्यब्दं द्व्य
ब्दमथापि वा ॥ सार्द्धाब्दमप्यर्धेकाब्दं यथाशक्तिसमाचरेत् ॥ स चोपदेशस्तु नमध्य
ह्नेन सर्वानुमत्या कार्यः ॥ ततः शक्तेनोपवासः इतरेण हविष्याशनं ॥ ततो द्वि
त्रिरहोभिरवसानं चेदन्यतमस्मिन्दिने कृतमध्याह्निकः शक्तिश्चेद्गंगादि
तीर्थं गत्वा सायाह्ने देशकालौ स्मृत्वा मम जन्मप्रभृति मरणपर्यंतं ज्ञाना
ज्ञानादिपातकान्युपपातकार्यं सर्वपापक्षयार्थं मरणकालशुध्यर्थं च ब्राह्मणैर्यदु
ना

॥२॥

पदिष्टं तत्सर्वं गोत्तरां गसहितं करिष्ये ॥ अस्य शक्त्येतस्मिन्नेव दिने कुर्यात् ॥
तद्गंग वपनं दंतधावनं भस्मादिदशस्नानानि पंचगव्यप्राशनं करिष्ये ॥ न सभ
र्तृकाणां स्त्रीणां वपनं कर्तव्यं ॥ तदुक्तं पाराशरेण ॥ वपनं नैव नारीणां नानुव्रज्या
जपादिकं ॥ न गोष्ठे शयनं तासां शिरश्चाल्यस्य वाजनमिति ॥ सत्यपि निषेधे जी
वत्पितृकस्य कर्तव्यं ॥ तथा च स्मृतिः ॥ क्षौरं नैमित्तिकं कार्यं निषेधे सत्य
पि ध्रुवं ॥ पित्रादिमरणे दीक्षासु प्रायश्चित्ते च तीर्थके इति ॥ निषेधे सत्यपि
त्युक्तप्रतिप्रसवः सिध्यति ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ केशानाश्रि
त्य तिष्ठंति तस्मात्केशान्वपाम्यहं ॥ कक्षोपस्थशिखावर्जं नखरोमाणि वापयेदिति स्मृतेः ॥ हा
हविष्याशनपक्षे दंतधावनं कुर्यात् ॥ तत्र मंत्रः ॥ आयुर्बलं यशो वर्चः प्रजां पुष्टिं व
सूनि च ॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो धेहि वनस्पते ॥ अन्नाद्यायेति वा ॥ इति दंतधा
वनं कृत्वा प्रक्षाल्य त्यजेत् ॥ अथ दशस्नानानि ॥ तत्र भस्मस्नानं ॥ तद्यथा ॥ ईशाना
य नम इति शिरसि ॥ तत्पुरुषाय मुखे ॥ अघोराय नम इति हृदये ॥ वामदेवायेति गुह्ये ॥

सद्योजातायेतीपाद्ययोः॥प्रणवेन सर्वांगे॥अग्निरिति भस्मेत्यादिर्वा॥इति भस्म
स्नानं॥गंधद्वारामिति गोमयेन॥अग्नमग्न्यरंतीनां मोषधीनां रसं वने॥त्रा सा
षभपत्नीनां पवित्रं कायशोधनं॥यन्मे रोगांश्च शोकांश्च नुदं गोमयस्य वृंदा॥इति
गोमयस्नानं॥अथ मृत्तिकास्नानं॥तदुक्तं पारिजाते॥बलिस्थापर्वतानामिति भिभूमिं प्रार्थ्य
मावो रिषन्खनितेति खनित्वास्यो नापृथिवीति मृदं गृहीत्वा आयुर्नेतेपरायणेति
दुर्वां गृहीत्वा गाय व्यावपृक्ष्य भर्मो निधायाचम्य मृत्स्नानं करिष्ये इति संकल्प्य॥
मृदं कुशोदकेनाभ्युक्ष्य दिक्षु क्षिपेत्॥त्रीन् भागान् इन्द्रमिति पूर्वस्यां॥यमायेति
दक्षिणतः॥तत्त्वा यामीति पश्चिमायां॥वयं सोमेति उत्तरतः॥तत्सूर्यस्येति सू
परिष्टेत्॥ततस्तया मृत्तिकया सर्वांगानि इदं विष्णुरिति विलेपेत्॥इति मृत्ति ॥३॥
का स्नानं॥गंगे च यमुने चेति तीर्थान्यावाह्यापो हि ष्ठेति त्रिऋचेन स्नायात्॥अ
थ पंचगव्यस्नानं॥गायत्र्या गोमूत्रेण स्नायात्॥गंधद्वारामिति गोमयेन॥
आप्यायस्वेति क्षीरं॥दधिक्राव्ण इति दधि॥घृतं मिमिक्ष इति घृतं॥देवस्य त्वेति कुशों॥स

॥२॥

११

अभिरिशावामिति सर्वत्र व्याख्या शेषः॥स्त्रीशूद्राणाममंत्रकं॥स्नानांगतर्पणं कु
र्यात्॥धौते वाससि परिधाय तिलकं कृत्वा विष्णुश्राद्धं कुर्यात्॥तदुक्तं विधानपा
रिजाते॥तत्रादौ स्वस्याधिकारायश्चित्तांगविष्णुश्राद्धं करिष्ये॥ततः प्रायश्चित्तरूपा
ध्याधिकारान् युग्मान् ब्राह्मणान् पूर्ववन्निमंत्रयेत्॥एवं अनिरुद्धस्थाने द्वितीयं
यं ब्राह्मणं प्रद्युम्नस्थाने तृतीयं॥पादौ प्रक्षाल्या[illegible]दत्वा गंधादिभिः सं
पूज्य॥आमान्नं संकल्पं कुर्यात्॥तद्यथा॥इदमन्नं यथोपस्कारं दत्तं दास्य
मानं च आत्मप्रेतकेशवायसंप्रदने मम॥एवमनिरुद्धप्रद्युम्नादिकानां भो
जनांते दक्षिणां दद्यात्॥न्यूनातिरिक्तं विष्णुश्राद्धं ब्राह्मणप्रसादात् संपूर्णम
स्तु॥अथवा विष्णुमुद्दिश्य त्रीन् ब्राह्मणान् गंधादिभिः संपूज्य भोजयेत् आमा
न्नं यथाशक्त्या दद्यात्॥इति विष्णुश्राद्धं॥अथ पंचगव्यं॥गवामंगेषु तिष्ठंति भुव
नानि चतुर्दश॥यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च॥१५ इति मंत्रेण गोदानं॥
पंचपरसंस्कारान् कृत्वा॥अग्निस्थापनं॥पापापहा महाविष्णुदैवतेन व्याहृतिभि

८

रष्टोत्तरशतमष्टविंशतिं अष्टौ वा जुहुयात् ॥ अथ पंचगव्यसंपादनं पलाशपात्रा
दिपात्रे रक्तायां गोमूत्रं त्रिपलं गायत्र्या प्रणवेन योजयेत् ॥ अंगुष्ठपर्वपरिमिति
तं श्वेतागोः पुरीषं गंधद्वारामित्यादाय कपिलापयः सप्तपलं आप्यायस्वेत्या
दाय ॥ ततो नीलायाः सप्तपलं दधिक्राव्णः इत्यादयः कृष्णायाः घृतमिति ४
एकपलं घृतं ॥ एकपलं कुशोदकं आपोहिष्ठेत्यादि प्रणवेनालोड्य प्रणवेन
॥४॥ सर्वं पिबेत् ॥ एतद्व्रतं नद्यादितीरे स्यामाद्बहिः न क्षेत्रदर्शने कार्यं ॥ गोमूत्रं परि ॥४॥
माणं शतस्या स्वल्पं वा स्याद्यं ॥ इति पंचगव्यविधिः ॥ ततो विष्णुं स्मरेत् ॥
मौनी भूत्वा निःशामतिक्रम्य ॥ प्रक्रान्तप्रायश्चित्तं विधाय उत्तरांगं कुर्यात् ॥
छे पूर्ववत्कृत्वा ॥ संकल्पविधिना विष्णुश्राद्धं कृत्वा पूर्ववद्गोदानं चरेत् ॥ इत्युत्तरांगं
अथ दशदानानि ॥ गोभूतिलहिरण्याज्यवासोधान्यगुडानि च । रौप्यं लव
णमित्याहुर्दशदानान्यनुक्रमात् ॥ तत्र गवामंगेषु तिष्ठंति गोदाने ॥ सर्वभूतानां

श्च याभ्रमिव राहोण समुद्धृता ॥ अनंतस स्वस्फलेदा भवतः शांतिप्रयच्छ मे ॥२॥ तिलाः
महर्षिगोत्रसंभूता काश्यपस्य तिलास्मृताः ॥ तस्मादेषां प्रदानेन मम पापं व्यपो
हतु ॥ हिरण्यगर्भगर्भस्थमिति हिरण्यं ॥ कामधेनुषु संभूतं सर्वक्रतुषु सं आज्यं ३
स्थितं ॥ देवानामाज्यमाहार मतः शांतिप्रयच्छ मे ॥ शरणं सर्वलोकानां लज्जाया
रक्षणं परं ॥ सुवेषधारि वस्त्रं त्वमतः ० धान्यं ॥ सर्वदेवमयं धान्यं सर्वोत्पत्ति
करं महत् ॥ प्राणिनां जीवनोपायमतः ॥ गुडः ॥ यथा जीवेषु विश्वात्मा विष्णुरेष्व
जनार्दनः ॥ सामवेदस्तु वेदानां महादेवस्तु योगिनां ॥ तथा रसानां प्रवरस्स
देवेक्षुरसो नमः ॥ ममतस्मात्परां लक्ष्मीं दद स्व गुड सर्वदा ॥ रजतं ॥ प्री
तिर्यतः पितॄणां च विष्णुशंकरयोः सदा ॥ शिवनेत्रोद्भवं रौप्यं मे ० ॥ लवणं ॥
यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना ॥ शंभोः प्रीतिकरं नित्यं मे ० ॥
इति दशदानानि ॥ अथाहिताग्न्यनाहिताग्न्योर्विशेषो लिख्यते ॥ सदा स्व
यं होमी न्यग्रो मनः स्वयं होमः करणाशक्तौ अन्येन होमं क्रियमाणे न स्वय

शौ

॥५॥

मग्नीनां समीपे गत्वोपविशेत्॥ समीपगमनाशक्तौ स्वदक्षिणतो यजमानमुपविश्य तत्
सायंहोमानंतरं यजमानो दुर्बलः स्यात्॥ प्रातर्होमपर्यंतं न जीविष्यतीति संभा
वना यदि स्यात्॥ तत्तत्कालमेव प्रातरग्निहोत्रहोमं कुर्यात्॥ यदि सायंहोमारंभ
कालेयजमानमरणशंका स्यात्तदा एकतंत्रेण होमद्वयं कुर्यात्॥ अत्र होमद्रव्य
हरणानंतरं प्राङ्नयनाद्यजमानमरणे होम्यस्य गार्हपत्यस्य दाहः॥ ततः प
रमाहवनीये॥ इति वासुदेवाः॥ पौर्णमास्येष्ट्यनंतरं दर्शात्प्राक् यजमानस्य मरण
शंका स्यात्॥ तदा अमावास्येष्टिं कुर्यात्॥ तत्र पौर्णमास्येष्ट्यनंतरं यावश्मिन्दिने
अमावास्येष्टिः क्रियते तस्मिन्दिनादारभ्य दर्शेष्टेः प्राक् यावंतः सायंप्रातर्हो
मास्तान् तंत्रेण जुहुयात्॥ केचित्तु कृष्णपक्षप्रतिपदि अमावास्येष्टिं कुर्वंति
न सायंप्रातर्होमान्॥ यजेतेत्यापि उपरि न यत्तं दर्शेष्टिः कर्तव्या॥ पिंडपितृय
ज्ञस्य दर्शानंतरं गत्वान्॥ एवं वैश्वदेवपर्वणि कृते यजमानस्य मरणशंकायां स्या
द्वरुणप्रघाससाकमेधशुनासीरियाणां समापनं॥ तत्र वैश्वदेवपर्व
णि कृते स्वपर्वपर्यंतं समासविधिना पर्वकाल उपस्थहोमलोप क्षातं दीकृत्या जुहुयात्॥

॥५५॥

पुनापक्षहोमं पुनः पुनापक्षांतेष्टिं कृत्वा वरुणप्रघासादि समापनीयं॥ पूर्वपक्षे
रात्रौ मरणशंकायां प्रातराहुतिरेव॥ तथा चानुपदं सूत्रे॥ नश्चेदपरपक्षोप्रया
णशंकेन यावत्सोपरपक्षस्यान्ति निश्चाचारात्पयः स्युस्तासां याप्रातराहुति
पतिसंस्थाप्य हुत्वाप्रसाध्यस्या मावास्यानि हविशेषा सामिपुयुरेव मयत्लोवि
लोपइति पूर्वपक्षे चेद्रात्रौ राहुतिरेवेति॥ कात्यायनस्यानिरपि॥ पौर्णमा
सेष्टेने यागे मुमूर्षुर्यदि याज्ञिकः॥ दर्शयागस्तदैव स्यादपकृष्याहुतिः
पृथक् कृ॥ सायंप्रातर्व्यपाः प्रोक्ता दर्शोपयंतर एव चेति॥ अयं आहिताग्नेः
धर्मस्यौपाधिकस्यतु॥ रव्याहरणानंतरं प्राङ्नयनाद्यजमानम
रणं होमस्य गार्हपत्ये प्रक्षिप्य दाहः॥ एवं कृते प्रातर्होमकालपर्यंतं जि
वेत्तिततः पुनः स्वकाले प्रातर्होमो न कर्तव्यः॥ तत्र इष्टप संभवे आज्य
संस्कृत्य पुरोनुवाक्या आज्या व्यवस्य हविषातदसंभवे चकेपले ना

स्येन चतुर्गृहीतेन प्रधानदेवतानां यागं कुर्यात् ॥ तस्याप्यसंभवे प्रतिदेवताप्र
णां हुतीं जुहुयात् ॥ एवमेव पक्षादिकर्मसकलं कर्तव्यं ॥ असंभवे चरुहोमदेव
तानामाज्याहुतिमात्रं वा ॥ एवं कृते न यथा मायास्यापर्यंतं जीवति तदा अमा
प वास्यायां केवलं पिंडपितृयज्ञो दक्षिणाग्नौ ॥ तद्यथा धानेव स्याशने दर्शेष्टिश्च ॥
ल न त्वासकलेष्टौ क्रियमाणायां विगृहणानंतरं प्रागस्मादेनोन्मरणे हि विन्नं ह
षं गार्हपत्ये दाहः ॥ आसादनादूर्ध्वं मरणे आहवनीये दाहः दोषः इति देवभाष्ये ॥
॥६॥ उत्सन्नाग्नेरुत्सन्नाग्नेः प्रवासे पिमृतस्य च ॥ वक्ष्यमाणविधानेषु तद्विधिः प्रोच्य
ते मया ॥ ततः संभावितसन्निकृष्टमरणयजमानं ज्ञात्वा मज्जमयगोमूत्रेनैन ॥६॥
र्थोदक कुशोदकैः स्नापयित्वा शुद्धवाससि परिधाय गोमयेनोपलिप्तायां भू
वि दक्षिणाग्रान् कुशानास्तीर्य तत्र प्राक्शिरसं उदक्शिरसं दक्षि
णाशिरसं वा ॥ भूमौ निवेशयेत् ॥ मुखे सुवर्णं निक्षिपेत् ॥ कांस्यमणिवैदूर्यं
वा ॥ देवताहृदये न्यस्य नमः रुद्र शिरसि न्यसेत् ॥ धात्रीफलं मुखे दद्यात् कुश

कुशमूलं पदे पुनः ॥ नमेरं रुद्राक्षं अन्यच्च ॥ रुद्राक्षं कुशमूलं वा शालग्रामं च पुस्तके
स्य ... प्राणा स्वजेयस्तु स गच्छति हरिमंदिरं ॥ इति दीपप्रज्वाल्य शालग्रामसन्निधौ
निधाय विष्णुपूजनं कर्तव्यं ॥ ॐ नमो वासुदेवायेति सततं जपः ॥ अथ उत्क्रांति भगवते
धेनुदानं ॥ अद्येत्यादि अमुकगोत्रस्यामुकशर्मणो मम सुखेन प्राणोत्क्रमण
र्थं अमुकसगोत्रायामुकशर्मणे संप्रददे न मम ॥ अत्र मंत्रः ॥ उत्क्रांतिधेनुप्रदाना
स्यामुखोत्क्रांति समुद्भवे ॥ तुभ्यं संप्रददे नाममार्गा समुत्क्रांतिसंज्ञिता ॥ अथ
वैतरणीदानं ॥ तदुक्तं हेमाद्रौ दानखंडे ॥ अद्येत्यादि अमुकसगोत्रस्यामु
कशर्मणो मम यममार्गस्थितवैतरण्याख्यनदीतारणार्थं गोदानमहं क
रिष्ये ॥ ॐ सप्तमस्तनी दिव्या गौः सवत्सानुपूर्वयत ॥ तदभावे तु गोरवतर को द्वार
णायवे ॥ पूर्वं यदि ति सुवर्णमंगीकृत दानं वेत् ॥ तदायद्दिनं आक्रे तिदानं तु वैतर
णीतु गां ॥ शक्नोत्यारुकतदा दध्याच्छ योदघानेतस्य चेति ॥ अरुक्रे रोगरहिते ॥
भक्तये वै वर्नेयुधिष्ठिरः ॥ यमद्वारे महाघोरे या सा वैतरणी नदी ॥ किंरूपा की

११७५

प्रमाणा सा कथं सा गरहिता कलौ ॥ कथं तस्याः प्रमुच्यंते केषां वा मनुसंततं ॥ केषां न
धातु कुत्र सा एनं हि स्नारंतो वद ॥ मार्कंडेय उ० ॥ यासौ वैतरणि नाम यमद्वारे महानदी ॥
तस्याः प्रमाणं रूपं च मया [illegible] सर्वे भयापहं ॥ शतयोजनविस्तीर्णा पृथुत्वे सा महासृ
रिता ॥ अगाधानंतरूपा सा दृष्टमात्रा भयावहा ॥ पूयशोणिततोया सा मांसकर्दमाने
मिता ॥ क्रिमिभिः संकुलं पूयं वक्रतुंडैरधामुखैः ॥ शिंशुमारैश्च मकरैः वज्रकं
रिसंयुतैः ॥ अन्येश्च जलजैर्घोरैर्युक्ता सा मर्मभेदिभिः ॥ पतंति तत्र वै मर्त्याः
क्रंदमानाः सुदारुणं ॥ हा भ्रातः पुत्र तातेति प्रलपंतो मुहुर्मुहुः ॥ विरमंतो नि
मज्जंति गच्छंति निगच्छंति देहिनाः ॥ चतुर्विधैः प्राणिगणैर्दृश्या सा महानदी ॥
तरंति तस्य दानेन विधानुपर्यंति ते ॥ धर्मिकादानलोशिश्चतातारंति नरोत्त
माः ॥ सानुकूला भवेच्चेन नदी वैतरणी तरां ॥ तच्च पुष्प नरव्याघ्र कथयामा
न युधिष्ठिर ॥ अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ॥ अन्येषु पुण्यकाले
षु दीयते दानमादरात् ॥ [illegible] कृष्णां कुर्याद्दिने तलीशुभां ॥ स्वर्णशृंगीं
रौप्यखुरां कांस्यपात्रस्य दोहनां ॥ कृष्णवर्णां [illegible] सप्तधान्यसमन्वितां ॥

॥७॥

कार्पासद्रोणशिखरे आसीनं ताम्रभाजनं ॥ यमं हेमं प्रकुर्वीत लोहदंडसमन्वितं ॥
महामहिषमारूढं दंडपाशकरं परं ॥ [illegible] दंडं समर्पयेत् बध्वा उडुपं पदं च घनैः ॥ उडुपोपरि
तां धेनुं स्वर्यदेहसमुद्भवां ॥ कृष्णाजिने कौशेये द्विवासः च्छोपानह संयुतां ॥ सप्तधान्या
न्यानि द्रोणमितानि उडुपं [illegible] ॥ समुच्चारये मंत्रं स्नात्वा गृहीतोदकं तु दत्ते ॥
[illegible] रूपा द्विजश्रेष्ठ भूदेवपंक्तिपावनं ॥ सदक्षिणा मया तुभ्यं कृष्णा वैत
रणी नदी ॥ तत्र दानमंत्रः ॥ धर्मराजं च मंत्रं च धेनुं वैतरणीं तथा ॥ सर्वं
प्रदक्षिणीकृत्य ब्राह्मणाय निवेदयेत् ॥ पुच्छं संगृह्य तन्व [illegible] नोरय्ये
दत्त्वा द्विजोत्तमं ॥ धेनुके त्वं प्रतिक्षस्व यमद्वारे महाभये ॥ उत्तीर्यते
रिरद्वारे वैतरण्यै नमोनमः ॥ अनुव्रजमंत्रः ॥ अनुव्रजे च गच्छंतं
सर्वं तां स्वगृहं नयेत् ॥ एवं कृते महीपाल संसारि [illegible] सुखदा कायेन

इति वैतरण्येदानं॥ ततः अमृतत्वकामनाये पुण्यसूक्तानि पठनिकरिषेव एवं यज
मानेनैव कर्तव्यं॥ तद्दशाहोपुत्रादिना कार्यं॥ ततः पुत्रादिवेदाहमिति कर्णजपेत्॥
ततः प्राणोत्क्रमणानंतरं पुत्रपौत्रोनप्ता भ्रातुः पुत्रिकापुत्रयाजामाताएव भगीन्यः
श्वसपिंडेवाशिष्यो भगिनीदुहितास्नुषाधर्मपुत्रादयो वा॥ आत्मनो यथा
नुसारेण प्रायश्चित्तं कुर्यात्॥ तत्र अघस्योदिति थोमपपितृमरणादिनादारभ्य ह
निखिलौर्ध्वदेहकर्माधिकारार्थं अमुकप्रायश्चित्तमहं करिष्ये॥ तदंगवपनं
करिष्ये॥ यानि कानि रिति॥ रात्रि मृतस्य तु कीपाकत्वेवपनप्रकारेव कार्यं॥
तदुक्तं स्मृतिसंग्रहे॥ वपनं दहनात्पूर्वं पश्चाद्दिनमृतेगुरौ॥ न कुर्याच्चेद्यथा
दाहः स्वयं च नरकं व्रजेत्॥ रात्रौ दग्धानु पिंडांतं कृत्वा वपनवर्जितं॥ व
पनं नरयते रात्रौ स्वस्तश्चावपनक्रियेति॥ पतिमरणे विशेषमाहुः शातातपः
एकोद्दिष्टं जलं पिंडं आशौचं प्रेतसत्क्रिया॥ न कुर्यात्सार्वर्णाद्न्यत्र बालीभर्तायामि
छत्ये॥१॥

॥८॥ ५

ऋते श्चवपनं कार्यं परहंसस्य सर्वदा॥ कर्तव्यं खननं मस्यनाशौचं नोदकक्रिया॥ पत्नी
च वपनं कुर्यात्सधवा सर्गे न कारयेत्॥ एकादशाहदशाहोवापार्वणं तु विधीयते॥ प्रायश्चि
त्ते कृत्वा गोत्रजैः सह स्नात्वा प्रेतसमीपमागत्य मधुपर्कदानं तत्र मंत्राः॥ संगच्छ मृ
गघ मृगे च देह मधुपर्कससारमोक्षणं॥ शरीरशौचं आगंतुं निहसि शरीरशौचं
तृण लोकनाथ प्रेतो कृत्वमिमं मधुपर्कमिति॥ ततो मंत्रप्रक्षालनं॥ अहतवस्त्रप
रिधानं॥ उत्तरीयं च॥ चंदनेन वा नानुलेपनं॥ पुष्पैरलंकरणं॥ इति देवभाष्ये॥
आदो भर्तृमरणे॥ स्त्रीमरणे वादाहादिकं कथं कर्तव्यमिति प्रसंगाल्लिख्यते॥
तदुक्तं देवभाष्ये॥ ज्येष्ठायाः कनिष्ठिका वा मृता गार्हपत्येकदेशमनि मध्ये
न वा पत्नीदाहं दहपक्षेयावज्जीवकुशपत्नी सुवर्णपलिका कृत्वा नित्यं स्वि
ग्निहोत्रं स्पयणानि न भवंति॥ आयसथेन वा पत्नीदाहः॥ तस्मिन्पक्षे केच
लस्यात स्पथ्य पुनराधानं श्रोतानस्तु न एव पुनर्विवाह संभवे आस्यार्थे
पुनराधानं कार्यं॥ तदुक्तं मापस्तंबेन॥ दारकर्मणि पर्यरिक्तो तामर्थमप्यापयें॥

दर्शपूर्णमासाग्निहोत्राग्रयणार्थं शेषान् भ्रपयंति॥ अन्ये कुशमयीं पत्नीं कृत्वा तु गृह
मेधिनो॥ अग्निहोत्रमुपासंते। या चज्ञीवती रुद्रिताः॥ यदा पुनर्गौः पदे च जायायाः सा मर
णं तयोः सहैव दाहः॥ तदुक्तं आपस्तंबेन॥ सहैव पितृमेधो द्विवचनलिंगान् मंत्रा
संतनमितीति॥ आश्वलायन आह लेपि॥ अपत्नीकोप्यग्निहोत्रमाचरेदिति॥ एवमग्
॥६॥ प्रधानासंभवे उत्सन्नाग्नेर्दाहार्थमग्न्याधानं कार्यं॥ तद्यथा तत्रापसव्येन दक्षिणा
मुखेन च सर्वं कार्यं। प्रेतस्य स्वाम्यासने स्थापनं॥ अग्न्यागारकरणं॥ खरत्रयसंस्कारः
गार्हपत्यस्य पश्चात् मथनं॥ तत्र मंत्रः॥ अस्याग्नयो जुकृनो मासको मा संकल्पयंतां
यजमानमासं॥ जायंतु ते हविषे सा दंपत्या नेहं विषे वर्गे लोके ममि मं प्रेते नयंतु॥ इति
मथित्वा गार्हपत्यस्थापनं ततः स्रुक्कीलाशो दुष्ठ्याज्यसंस्कृत्य चिदाप्ति गृहीतग
ही त्वाहवनीयं तृकीहत्वा दक्षिणाग्निमुपधृत्य संदीपनं वस्त्वघी भयेण। दि
दाहान्तं कुर्यात्॥ एवं पत्न्याः पश्चात् मरणेपि शेयं॥ अथ पुत्रादि स्नातः॥ कृतापसव्यः॥

मकृद सकृत् पारि समोहनादिसंस्कारपूर्वकं दाहार्थं संतापजाग्न्युत्सादनार्थं आहव
नीयदक्षिणाग्निं विहरति॥ ततः केनचित् सन्निहितेन गार्हपत्यादाहवनीयदक्षिणाग्नि
षु तीर्थाम्रमयी स्थालीः शुष्कगोमयचूर्णयुक्ता अधिश्रयति॥ अत्र सर्वमपसव्येन॥
दक्षिणामुखेन च॥ सभ्यावसथ्ययोर्नयनं स्थाल्यो मध्ये निधाय प्रस्कन्नावेक्ष
सर्वासु स्थालिषु संकरोमा भस्मेत दर्पनामलेखनादि चिन्हं कार्यं॥ ततो मरण
स्थाने एकोद्दिष्टविधिना प्रेतश्राद्धं॥ तत्र सर्वं दकीतत्रप्राब्राह्मणासंभवे एके
दर्भबटुमुपवेश्य॥ सर्वं कुर्यात्॥ अद्येत्यादि अमुकसगोत्रस्यामुकप्रेतस्य
प्रेतत्वविमुक्त्यपेक्षाहादियोग्यतासिध्यर्थं मरणस्थाने एकोद्दिष्टविधाना
श्राद्धमहं करिष्ये॥ आवाहनासनाद्यार्चनपात्रालंभनावगाहनोऽभावः॥ अ
सनं॥ उपहारप्रोक्षणं आमंत्र्य संकल्पः॥ पिंडदानं चितिकरान्नेजनरेखास्
त्यवनेजनगंधार्चनानामभावः॥ अक्षय्योदकदानमाशिषः स्वधावाचनायां

नत

याग्निकाभावः॥ समासान्ते कुंभदानं॥ अस्थिरस्य नामि तिष्ठा बहु विसर्गः॥ श्राद्धानंत
रं शावनोत्थाम नस्थाने पिंडदानं अमुकस गोत्रामुकशर्मेति प्रयोगः॥ सजल माष
नेकुंभदानं ततो द्वारदेशे पूर्ववच्छ्राद्धं॥ ततः पांथानोत्थापिंडदानं॥ अमुकस गोत्रा
पांथाय॥ तत इति कुंभदानं॥ ततो अरिद्रवस्त्र आघादितं शवं स्थापयित्वा सर्वाणि पात्रा
णि पृषदाज्यदर्भास्तिलान्वशिस्थाप्य पंचाग्निसहितं हारिद्रवस्त्राघादितं शवं स्था
परित्वा सर्वाणि पात्राणि पृषदाज्यदर्भास्तिलान् घृतं समदाहि रण्ये शीकस्तानिका
स्थानि गृहीत्वा सपिंडा अन्ये या दक्षिणस्यां दिश्यरण्यं गच्छंति॥ तदुक्तं विधानपारि
जाते॥ आसौधांधेनमारोप्य गंधपुष्पाद्युक्तं तं बध्वीया बांधवैः सास्यपातां गुरुश्च
बुभौ दद्यात्॥ आसंदीलक्षणं॥ खादिरैर्वैणवैर्वापि शाकवैर्वाथ संमितं॥ साचासं
दी चतुर्विंशत्संगुलायामतः समा॥ चत्वारो द्वौ च पादौ द्वारो अपसव्याकुरौ स्तथा॥
कृत्वानुवरणं तेषामथा संधूवरो हतं॥ निर्वितिनो यदि युस्तन्यात पान्येचवाहकाः॥
नंथोचस्मृतिः॥ ऋषिनर्पणे चाण्डाल भाषणेश्चेनया हे नविण्मूत्रे मैथुने तैवषण्नी॥ चिनि

॥१०॥ ॥१०॥

समाचरेत्॥ योहकागर्भिणिपतिः जीवास्तिन्त्ववर्जनं॥ तथा च धर्मप्रदीपे॥ प्रेतचाहंगयाश्रा
द्धं मौंजिबंधनमेव च॥ विदेशगमनं क्षौरं न कुर्याद्गर्भिणिपतिः॥ स्कंधेप्रतस्य वह
नेस्नानंकेशाविभागतः॥ नजीवस्पित्रकः कुर्यान्निर्जनोपरोप्य धरणं॥ यमगाथां
गायमानायमसूक्तं च गच्छंति॥ अथ यमगाथा॥ अहरहर्नयमानो गामश्वंपुरु
षंब्रजं॥ वैवस्वतो नतृप्यंति सुरयाइवदुर्मतिरिति॥ अपेतोयंतु पणय इतियम
सूक्तं॥ अतः अंगणे प्रेतनाम्ना पिंडदानं॥ उदकुंभदानं च॥ ततो ग्रामस्मशानयो
र्मध्ये आसंघादिभागे प्रायश्चित्तं॥ आसंघायापपि भग्नायां कुशानेपतिते पि
वा॥ तस्यात्रभंगे रज्जुनां दाहछेदेपि वा पुनः॥ २॥ चेन्निपतितेवापि अन्यास्मिन्वा
पथानने॥ प्राजापत्यं ततः कुर्यात्कर्म सर्वं प्रवर्तते॥ पिदिस्याभिवच नान्॥ ततो
र्धमार्गे पूर्ववदेकोद्दिष्टश्राद्धं॥ अमुकस्य गोत्रस्यामुकप्रेतस्यदाहार्थं स्मशा
ननीयमानस्य श्राद्धमार्गे विश्राम स्थानेश्राद्धं करिष्ये॥ पूर्ववच्छ्राद्धं॥ श्राद्धानंतरं

निदान

न

तनाम्नाचतुर्द्दिक्षुपिंडदानं॥प्रेतवाहएतत्तेपिंडमुपतिष्ठतां॥प्रेतसखीएतत्ते॰प्रेतएतत्ते॰
प्रेतवल्लभएतत्ते॰ततोनिर्हरणंकार्यं॥स्मशानसंनिधौभूमौशवस्यदक्षिणशिरःसंस्था
पनं॥ततस्तस्मिन्स्थानेशववदेकोद्दिष्टश्राद्धं॥उदकुंभदानंच॥ततःप्रेतनाम्नापिंडदानं
कुंभदानंच॥ततःसर्वाणितीर्थानिमनसाध्यात्वाशवस्यस्थापनं॥ततःपूर्वादेःस्नानं॥
समेवकुलन्तूलप्रदेशेउशीरिण्यादिमूलनं॥गार्हपत्यादिखरसाधनं॥सर्वप्राचीना
॥११विनिर्दक्षिणमुखंकुर्यात्॥गार्हपत्याहवनीयदक्षिणसंस्थानेषुसकृदसकृद्धूसंस्का॥११
राकुर्यात्॥तत्रस्थापनं॥चितेःसभ्यावसथ्ययोरुत्तरतःश्मशान्यांवापंचमेषुसप्तमेषुवा॥
ततोगार्हपत्याहवनीययोरंतरालेकाष्ठैःप्रागायतांचितिंकुर्यात्॥ततस्त्रेतस्यके
शश्मश्रुलोम्नांछेदनं॥केशादीनांनिखननं॥प्राचीयमुत्तरलोमकृष्णाजिनमास्ती
र्य॥तस्मिन्प्राग्शिरसमुत्तानंप्रेतंनिदध्यात्॥प्रेतसंबंधिवस्त्रंद्विधाविभज्यएकेन
खंडेनप्रेतमाच्छाद्यखंडांतरंस्मशानेवास्यर्थंभूमौनिरसेत्॥प्रेतकरेप्रेतनाम्नापिंडदानं॥
प्रेतमाज्येनाभ्यंजनं॥मुखादिसप्तसुप्राणायतनेषुसप्तहिरण्यशकलप्रक्षेपः॥ततःआगम्या

च्युतराणानिसर्वाणिपात्राणिवक्ष्यमाणविधिनाप्रेतशरीरेनिदध्यात्॥सव्येपाणौस्फिकां
प्रागग्रमुपभृतंस्यहृदयेप्रागग्रांशिरसिध्रुवां॥मुखेप्रागग्रांअग्निहोत्रहवणींदक्षिण
नासिकायांचैकंकनं॥स्रुवंप्रागग्रमुत्तानं॥कर्णयोःप्राशित्रहरणे॥शिरसिरसिरंप्रणी
ताचमसंकपालानिच॥अस्थुवाप्रक्षेपः॥पार्श्वयोःशूर्पेएकंचैष्टिकं॥द्वितीयंवरु
णप्रघासेषुप्रतिप्रस्थानमेषीकरंभपात्राद्यंयवग्रहणादौयदुपयुक्तं॥लौकिक
मेवेतिकेचित्॥एवंकेचिद्द्विधाविभज्यपार्श्वयोरेकैकंखंडंआसादयेत्॥उदरेद
षदाज्यवतीरंप्रागग्रमुखामिनसमिपरोप्यांप्रागग्रामंडयोःसमीपेउदगग्रे
अरणीतत्समीपेअधोमुखंउलूखलं॥मुसलंआज्यस्थालीपीठपात्रउपवेश
षडवनाभ्निम्नतोयवतानपुरोडाशपात्रीपीठपूर्णपात्रकूर्चब्रह्मासनप्रमुखानि
सर्वाणियज्ञपात्राण्यनुक्तस्थानान्युर्वोर्मध्येआसादयेत्॥उदरेदृषदंदाज्यंच
तीस्मार्तपात्राण्यरणिसहितानिपयरूणप्रघासिकानिचैतत्रैवस्थालीकपाला
दीनांमृन्मयानांपाषाणमयादीनांचाप्सुप्रक्षेपः॥लोहमयादीनांचाप्सुप्रक्षेपोवा

शेरन

भ्रा

-र्च

ब्राह्मणाय दानं वा आज्यस्थाली मृन्मयी समर्थाने प्रक्षेपप्रक्षेपः ॥ ततः आहवनीयादिनामाः
लभ्याम मंत्रं पठेत् ॥ कृत्वा सुदुष्करं कर्म जानता वाप्यजानता ॥ मृत्युकालवशं प्राप्य
नरं पंचत्वमागतं ॥ धर्माधर्मसमायुक्तं लोभमोहसमावृतं ॥ दहेयं सर्वगात्राणि दि
व्यान्लोकान्स गच्छतु ॥ ततश्चंदनैः पुष्पाक्षतैरग्निनां पूजनं ॥ तत्र मंत्रः ॥ त्वं भूतकृ
ज्जगद्योने त्वं लोकपरिपालक ॥ उक्तः संस्कारकः स्मात्स्मादेनं स्वर्गं मृतं नय ॥ ततो
॥१२॥ ग्निशिखैनेरादीपनं ॥ तत्रादौ शिरोदेशे ॥ तदुक्तं माध्यंदिनायनपरिशिष्टे ॥ कर्ता शिरसि ॥१२॥
चाग्निं ददाति ॥ तं ज्वलयेयुरिति ॥ मृतस्य पत्नी चाभावे तावान्यो ब्राह्मणो वा कृतोप
सव्यो दक्षिणामुखः गार्हपत्ये आज्यं संस्कृत्याहवनीयं परिस्तीर्य समिध
माधायास्मात्त्वमधि जातोसीति मंत्रेण जुह्वा सकृद्गृहीत्वाज्याहुतिं जुहोति ॥ इद
मग्नये इति त्यागः ॥ स्त्रिया अप्यस्य मंत्रस्यानूहः ॥ ततो जुहूं घृतेन पूरयित्वा प्रेत
तस्य दक्षिणहस्ते प्रागग्रां आसादयति ॥ स्वादिरं स्रुवं सव्यनासिकायां प्रा
गग्रमुत्तानं ॥ स्फ्यं दक्षिणहस्ते पात्रं सोविरो पादाज्यस्थाल्या उर्वोरंतरे प्रक्षेपः ॥

मृन्मयी चेद् प्रक्षेपः दक्षिणांगैर्दर्भैश्चिरः शिराच्छादनं ॥ ततः स्कंधे दक्षिणे कुंभं कृत्वा प्रत
पादप्रदेशे धृतं पाषाणं गृहीत्वा स्वयं कनिष्ठभ्राता वा पृष्ठपृष्ठे दृष्टौ घटं भीत्यो छि
द्रं कृत्वा तेन आरभ्य प्रदक्षिणं विनिपरिनोधारां दद्यात् ॥ ततः शिरोदेशे पश्चाद्दत्त्वा
लोकं यतः कनिष्ठ पृष्ठतो सर्वे गच्छेयुः ॥ येन पाषाणेन स्फोटनं कृतं दशरात्रि पर्यंतं तत्
द्रक्षणीयं विधेयं ॥ उत्तरीयवस्त्रसंरक्षणं च ॥ ततः उदकसमीपं गत्वा लौकिक प्रे
षोगाढं रोदनं च ॥ अथ वा वसव्यपात्राणां प्रतिपत्तिर्लिख्यते ॥ शिरस्याचमस
पार्श्वयोः शूर्पे छं भवणाकं मर्संबंधी द्वितीयं ॥ एवं चेद्विधा कृत्वा पार्श्वयोः कुर्यात् ॥
आंड्योररणी उदरगामे ॥ प्रोक्षणीपात्रादिनामप्युदरं तूरप्रक्षेपः ॥ चारात्रौ चितिकये
श्चे ॥ मृन्मयादिनामभ्यसि ॥ कृत्वा सुदुष्कर चिते निमिर्त्यो दिशा दीपनं ॥ वह्निपूजा ॥
आज्यं संस्कृत्य समूर्ज स्रुवेणास्मात्वमिस्याहुतिहोमः ॥ दक्षिणना सायां स्रुचं ॥
स्प स्य दक्षिणहस्ते शेषमाहिताग्निवत् ॥ आहिताग्नेः रग्निपुर्वं स्मार्तपात्रा
णां प्रतिपत्तिं कृत्वा नंदनं तर श्रोता सा पात्राणां मितिशा ह्यायनिः ॥ तथाच क
त्यायनः ॥ एवमेवाहिताग्नेस्तु पात्रन्यासादिकं भवेत् ॥ कृष्णाजिनादिकं चात्र विशेषः ॥

सूत्रचोदितइति॥शाक्ष्यायनिश्चसंध्यावसथ्यावाहिताग्निनदहकर्मणिनप्रयुज्यते॥तयोःप्रा
गुदिच्यांदिशिचितांदेशात्तुल्येवप्रक्रमात्तिक्रम्यान्नीतिक्रम्यपंचसंस्कारांस्त्यक्त्वोत्सृजेतीति प्र
पूर्वमिवोक्तं॥पात्राणितुप्रयुज्यंते॥ततःकपालमोक्षांतं स्थित्वादाहेजाते किंचिदस्थिशेष
णंकुर्यात्॥निःशेषस्तुनदग्धव्यइतिवचनात्॥एवंदिवामृतस्यदिवादाहः॥रात्रिम
तस्यरात्रावेवदाहः॥तदुक्तंविधानपारिजाते॥दिवावायदिवारात्रौशवस्तिष्ठतिक
॥१३॥र्हिचित्॥तस्ययुषितमिस्याद्दहनेतस्यकागतिः॥पंचगव्येनसंस्थाप्यप्राजापत्यत्रयं॥१३॥
चरेत्॥तदादाहंप्रकुर्वीततस्त्रोदिशास्त्रतःक्रमात्॥दाहेक्रीयमाणेयस्याग्निःशाम्येत्तुआ
हरेत्तु॥गानेषुअग्निषुतदेहार्द्धंचेत्तुध्यतेकचित्॥तद्देहंदुकाष्ठेतुनिखानिमंध्यंतद
हेत्॥पश्चाद्गंधकाष्ठेतुतद्विध्यंचेनलभ्यते॥तदानछवरखंडंतुप्रक्षिप्यव्यंम
होजनेत्॥अन्यत्र॥अथाग्निनाशानहस्यादाहितानाग्नेनदीप्यते॥तयोरमुकंम
थिचेनसंस्कुर्युस्तारभायतेःतत्रास्मस्पृष्टकाष्ठेनमापितानिदेहे शवंतत्रमुख्यावा
पोऽकुर्यान्होमंस्वर्णवस्त्रघटनाकुर्तिःसचेलाधास्त्रच्चातेनदग्धशेषंक्षिपेनहति॥

ततःपुत्रादयःसप्तसमिधागृहीत्वाचिताग्नेप्रतिप्रदक्षिणमेकैकसमित्प्रक्षेपंकुर्यात्
ततकुठारेणोस्मुकोपरिपप्तप्रहाराःकर्तव्याः॥क्रव्यादायनमस्तुभ्यमितिपठंति॥ततः
श्चितामुक्तास्नानार्थंगच्छति॥प्रेस्यूतरनोदाभिर्ह्येकंचनपुरुषंशालकंवोदकंकरिष्या
मइतिमंत्रेणोदकंयाचेते॥कुरुध्वंमाचैवंपुनरित्यरातवर्षेषुनइतिप्रतिवचनं॥श
तवर्षप्रतेकुरुध्वं॥ततःपुत्रादयःसपिंडाःसमानोदकाश्चएवस्त्राःप्राचिनावीतिनो
मुक्तकेशादक्षिणामुखाःसव्यपाणेरनामिकयापघुसत्वेदेवअपनःशोशुचदघ
मितिमंत्रेणनिमज्जंतिहंकी॥सर्वैमलोपहस्नानंकुर्वंति॥अंगोद्धर्षणस्यचिहितप्राणि
विद्धुस्याद्विकम्पः॥ततस्तीरमागस्यशिखांबध्वादक्षिणाग्न्यादर्भान्अयुग्मान्कंजुर
हस्तयोःकृत्वासतिलकंपाणिभ्यामादायदक्षिणासुरवावाग्यताःपितृतीर्थेनाभ
मोपाषाणेनवाएकैकमञ्जलीतिस्त्रास्त्रिस्त्रोवानिषिंचंति॥अमुकसगोत्रामुक
प्रेततर्पयंतुतर्पयतामितिवा॥अमुकसगोत्रस्यामुकप्रेतस्यप्रेतसमुक्तेप्रथमदिनेलं

विधिं कर्तुं स्नानमहं करिष्ये॥ स्नात्वा कुशेषु स्मानं स्थापयेत्तस्य दशाहजनितं तच्छौचश म
नार्थं तिलतोयांजुलिदानं करिष्ये॥ अमुकसगोत्रामुकप्रेत दशाहजनितं तच्छौचपरांस्यर्थं प्रथ
प्रथमेहानि एतत्ते तिलोदकमुपतिष्ठतामिति॥ एवं दशाहं तत्प्रत्यहमेकैकमंजलिं वर्द्ध
येत्॥ दोयं वात्र यथा प्रत्यहमेकमेव वा॥ स्नात्वामुदकस्य गोत्रामुकप्रेत एतत्ते अवने
जनमुपतिष्ठतामिति॥ अमुकसगोत्रा अमुक अमुकप्रेत आद्येहानि शिरोवयवनिष्पत्त्यर्थं
॥१४॥ क्षुत्तृषाशमनार्थं प्राणपुनिष्पत्तये च एष पिंडस्तवोपतिष्ठतामिति॥ तथैव प्रत्यवने
जनं॥ पिंडपूजां च कुर्यात्॥ तथैव ब्राह्मण॥ दद्यात् प्रेताय पिंडं तु दक्षिणाभिमुखः स्थितः॥१४
अर्घ्यैः पुष्पैस्तथा धूपैर्दीपैस्तोयैश्च शीतलैः॥ ऊर्णातंतुमयैः शुद्धैर्वासोभिः पिंडमर्च
येत्॥ पिंडस्योपरि हस्तं दत्वा॥ अनादिनिधनो देवः शंखचक्रगदाधरः॥ अच्यु
तः पुंडरीकाक्षः प्रेतमोक्षप्रदो भव॥१॥ अतसीपुष्पसंकाशं पीतनिर्मलवाससा
ये नमस्यंति गोविंदं न तेषां विद्यते भयं॥२॥ अक्षय्यमिति पिंडविसर्जनं॥ स्नात्वा न
वश्राद्धं कुर्यात्॥ तथा च स्मृतिः॥ प्रथमे॥ न्हि तृतीये वा पंचमे सप्तमेपि वा॥ नव
मैकादशे चैव षण्णवश्राद्धमुच्यते॥ अद्येह स्नादि अमुकसगोत्रस्यामुकप्रेतस्य

प्रथमेहनि नवश्राद्धमहं करिष्ये॥ कुशोसि कुशपवित्रोसि ब्रह्मणा निर्मितः पुरा॥ पाणिनो
द्धारणार्थाय कुशामेथि विधीयते॥१॥ इति कुशभट्टं विधाय॥ कुशभट्टाय नवश्राद्धक्षण
मुपतिष्ठतु॥ पाद्यमुपतिष्ठतु॥ अर्घ्यमुपतिष्ठतु॥ आमान्नं॰ नतः पिंडस्थाने अवने
जनं॰ गोत्रः नवश्राद्धेयं पिंडमुपतिष्ठ॰ पिंडस्योपरि प्रसपने जलं॥ उदकुंभं पिंडस्यो
परि हस्तं दत्वा अनादिनिधन इति स्तोत्रं पठित्वा अभिरम्यतामिति वदेत्॥ पिंडम
ल्लाप्य स्नायात्॥ एवमेव नगप्रघादनश्राद्धं॥ तथैव पाथेयश्राद्धं॥ आमान्नेन सर्वं
एवं नवश्राद्धादि समाप्य॥ वस्त्राणि परिधाय सर्वैर्गोत्रजैः स्नानवस्त्राणि सह देवनि
ष्पिंड्या दग्दशानि वित्तस्य गुच्छे देशे तत्र एव तीसर्वे उपविशंति॥ तत्रोपविष्टान
मन्ये सुहृदयपुराणेतिहासकथाभिः संसारनित्यतां व्याख्यायं तत्॥ शोकापनोदं कु
र्युः॥ नो ब्राह्मणैरनुज्ञानः॥ ततोत्थाय पश्चाद् नवंको कृत्यं तो धोमुखः॥
कनिष्ठान्ग्रे कृत्वो पंक्तिभ्र नाघे गत्वा मंत्रस्या पाति॥ दिवा मन्ने अस्तमयाद्ध

॥१५॥

ग्रामं प्रविशन्ति ॥ रात्रौ मृते त्सूर्योदयानन्तरं ॥ अथवा ब्राह्मणैः अनुज्ञाताः सन्दानि मे प्रवि-
शन्ति ॥ ततो गृहद्वारसमीपे मागत्य त्रीणि निंबपत्राणि विदश्याचम्य शमीपापं शयं चेति
शमी मालभ्यन्ते ॥ अश्मवत्स्थिरी भवेत्यासमिस्पृश्य अश्मानं ॥ अग्निर्नः शर्म यच्छत्वित्यग्नीनुद-
मुदकं ॥ गोमयं गौरसर्षपान्स्नैलं ॥ दूर्वाप्रवालं वृषभं च यथाक्रममालभ्य ततः पदेन
पाषाणमाक्रम्य गृहं प्रविशन्ति ॥ अथ प्रथमादिनां नियमः ॥ ब्रह्मचारिणोऽधः पृथक्शयि-
ताउधउपवेशिनः ॥ परस्परमसंस्पृष्टा नोऽध्ययनवर्जिता ॥ मालिनाऽधोमुख
सर्वभोगविवर्जिता ॥ अंगसंवाहनं केशसंमार्जनं वा कुर्वतो न किंचन कर्म कुर्युः ॥
न कारयेयुः ॥ रक्षाप्यादिपयः शोच्या एकरात्रं त्रिरात्रं वा उपवसेयुः ॥ अशक्तौ वेकोनत्री-
हीयवादिकारंसारन्नं च लमाषान्नोपपायसवर्जितं ॥ पाणिषु मृन्मयेषु वा एकवारं
क्रीत्वा कुम्भे नादद्याम्नेयत्नेनाद्यादिनांते द्वितीयो वा ॥ अमस्तियुनैरात्रौ भोजनकाले भक्तमु-
ष्टिं दद्यात् ॥ तदुक्तं शातातपेन ॥ भोज्या भोजनकाले तु भक्तमुष्टिं च निर्वपेत् ॥ नाम गो-
त्रेणासंयुक्ताधारित्र्यां पितृयज्ञवत् ॥ दशरात्रमेते नियमाः कर्तव्याः ॥ एवं दशरात्रपर्यन्तं ॥

॥१५॥

मवनेजनपूर्वकं पिण्डदानं प्रत्यवनेजनसहितं कर्तव्यं ॥ तायेवरात्रिमृन्मयेशरिवावेष्टिशिरो
दकेलत्वाविहायसि स्थापयेयुः ॥ प्रेतात्रस्नाहि निमन्त्रेण चिरात्रेश्वरादपस्तु द्रव्यद्वयनिधा-
न समर्थ्यो तात्रद्वयमिच्छन्ति ॥ अत्र स्नाहस्तेनापि वदंति ॥ रजिते घनाधस्तैनोप्रेतकास्यां प्रथमदि-
ने कृत्यं समाप्तं ॥ अथास्थिसंचयनं लिख्यते ॥ तदुक्तं हारिहरभाष्ये ॥ ब्राह्मणस्य चतुर्थेऽहनि
पंचमे क्षत्रियस्य नवमे वैश्यस्य एकादशे शूद्रस्य त्र्याहाशौचे द्वितीयेऽह्नि सर्वेषां ॥ सद्यः
शौचानां तदाहमेव ॥ तथा च स्मृतिः ॥ प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा ॥ अस्थिसंचय-
नं कार्यं दिने तद्गोत्रजैः सह ॥ इति ॥ सद्यः शौचे तद्दिने काहे सद्यः संचयनं भवेत् ॥ त्र्यहाशौ-
चे द्वितीयेऽह्नि कर्तव्यं त्वस्थिसंचयः ॥ तथैव ॥ चतुर्थे ब्राह्मणानां तु पंचमेऽहनि भूभुजां ॥
नवमे वैश्यजातीनां शूद्राणां दशमात्परं ॥ इति ॥ चतुर्थ्यां संचयनमिति ॥ कात्यायनः ॥ स्मृ-
तिरपि ॥ स्मशाने देवतायागं चतुर्थे दिवसे चरेत् ॥ सूपकैर्भक्ष्यभोज्यैश्च पायसैः पा-
नकैस्तथा ॥ फलमूलैर्वनोत्थैश्च पूजां क्रव्याददेवताः ॥ तद्यथा कर्तासगोत्रजैः गंध-
पुष्पादिसामग्रीं संपाद्य स्मशाने गत्वा स्नात्वाचम्य धंमन्त्रं विधाय ॥ कर्दमत्रौ बालं

॥१६॥

पलाशपुटं शमीशाखेवोदकुंभादिकं स्थाप्यास्थिसंचयनश्राद्धं कुर्यात्॥ तत्राचम्य दक्षकालौ स्मृत्वा
स्थिसंचयनश्राद्धं करिष्ये॥ पूर्ववच्छ्राद्धं संपाद्यामान्नत्रयं दत्त्वा स्मशाने क्रव्याद मुखेभ्यो देवेभ्यो
नम इति मंत्रेण गंधादिभिरभ्यर्च्य मंत्रेण बलिं दद्यात्॥ तत्र मंत्रः॥ नमः क्रव्याद मुखेभ्यो देवे
भ्य इति सर्वदा॥ ये स्मिन् स्मशाने देवास्तु भगवंतः सनातनः॥ ते स्मत्सकाशात् गृह्णंतु बलिमष्टांग
संक्षयं॥ प्रेतस्यास्य शुभान् लोकान् प्रयच्छंतीति शाश्वतान्॥ अस्माकमायुरारोग्यसुखं संचद
दतोक्षयं॥ अनेन बलिं दत्त्वा विसर्जयेत्॥ क्षीरमिश्रेणोदकेनास्थिभस्मोपरि सिंचेत्॥ प
लाशवृंतेनास्थीनि प्राग्दक्षिण्येन परिवर्त्य ऊर्ध्वकनिष्ठिकाभ्यां पलाशपुटे स्थिग्रहणं
तद्यथा॥ दृष्ट्वा विषमांकं तत्सहितनाए केकमस्थि पादप्रभृति शिरःपर्यंतं यथा भंगानि
भवंति तथा॥ पालाशपुटे निदध्युः॥ स्तक्षान्यस्थीन्यपि सर्वं भस्म जले क्षिपेत्॥ भस्म
राशौ शमीपत्राणि कर्दमशैवालौ क्षिपेत्॥ अस्थीनि पंचगव्येन प्रोक्ष्य घृतेनाभ्यज्य
कर्पूरादिभिर्विलीपयेत्॥ ततः आग्नेयां दिशि गत्वा मार्जयित्वा काननरक्षमूले गंगोदेशे वा
गर्तं खात्वा कुशानास्तीर्य हरिद्ररक्तवस्त्रखंड चास्तीर्य वागीशनेन मंत्रेणास्थीनि वस्त्रखंडे

निक्षिपेत्॥ तथा च स्मृतिः॥ प्रेतस्यास्थि निगृह्य तिप्रधानां गोऽङ्गानि च॥ पञ्चगव्येन सं
स्नाप्य क्षौमवस्त्रेण वेष्टयेच्च॥ प्रक्षिप्य मृन्मये भाण्डे नवे संपादने शुभे॥ अरण्ये वृक्षमू
ले वा शुद्धे संस्थापयेत् पि गृहीत्वास्थीनि तद्भस्मनी त्वा तोये विक्षिपेत्॥ अथ दशाहाभ्यन्तरे
गंगादितीर्थे अस्थिप्रक्षेपमाह गौतमः॥ दशाहाभ्यन्तरे यस्य गंगातोये अस्थि मज्जति गंगायां
मरणं यादृक् तादृक्फलमवाप्नुयात्॥ इति॥ अथ नयनप्रकारः॥ अजिनी कंबलं मुञ्जा गोन
॥१७॥ केशाः पाषाणमेव च॥ भूर्जपत्रं तालपत्रं सप्तधा वेष्टनं स्मृतं॥ हेमं च मौक्तिकं रौप्यं प्रवालं च
मौक्तिकं तथा॥ निक्षिप्यास्थि मध्ये तु शुद्धिर्भवति नान्यथा॥ ततो होमं प्रकुर्वन्त तिलाज्ये
न विचक्षणाः॥ उदीरानेति सूक्तेन हुतेष्टो नरं शान्तं॥ ततो गत्वा क्षिपेच्छीघ्रं स्पर्शदोषान् ॥१८॥
विघते॥ मृतं तु रिषं वपनं कुर्वन्नास्थि निधारयेत्॥ इति॥ अथास्थिक्षेप विक्षेपोपि तन्मेधं
चिकित्सु गंत्वा स्नात्वा कुंभान्निधार्य च स्वयं कुशान्॥ नास्तिर्यं गामी स्यनेन मंत्रेणास्थिक्षेपं कुर्या
त्॥ त्वामन सानाज्ञेन या चान्न हत्यागत्या विद्यपापं धिव्या मक्षितायामपांडुरसौ निवपा
म्यसौ॥ अमुकरा मंत्रेन वपामि नित्यो॥ अश्वक्न्यादवलिः॥ यथा कुंभोन दृश्यं तेन थाम्यदे

पिधाय पश्चाद्दनवेक्ष्यमाणा अत्रैव्येगत्वा स्नानं कुर्युः॥ ततो गोमयेनोदकेन स्मशानभूमि
मुपलिप्य त्रिकोणां वेदीं कृत्वा हरिद्रादिनालंकृत्य सतोदकेपूर्णं कुंभं तस्योपरि पिंडं दद्यात्॥
तद्यथा॥ अद्येह सादि अमुकसगोत्रामुकप्रेताय भोजनार्थं अयं पिंडः पानार्थमुदकुंभ
मुपतिष्ठतामिति॥ अमांसकुशजलं क्षिपेत्॥ तस्याग्निमभागि स्मशानवासिने रुद्राय
यं पिंडमुपतिष्ठतामिति॥ अथोत्तरतः स्मशानवासिभ्यः प्रेतेभ्यो यं पिंडमुपतिष्ठतानेनः
र्वै प्रेतसखिभ्यो यं पिंडमु॰ तेनोदक्षिणतः प्रेतपापाय यं पिंड॰ ततः क्रमेण नैवां उपरि ति
लोदकं दद्यात्॥ ततः कोणाय दहनपतये॰ मृत्यवे दहनपतये॰ यमाय दहनप॰ एतेषां
त्रयाणामपि क्रमेण पोलिकात्रयं पादुकाषट्कं छत्रयं च दद्यात्॥ यमाभिर्भ्यामितिद्विपु
पतिष्ठतां पालिकां दद्यात्॥ इत्यस्थिसंचयनं॥ अथ द्वितीयदिनकृत्यं॥ पूर्वे दिवं
सवि [illegible] गत्वा स्नात्वामुकसगोत्रस्य स्यादि प्रेतस्य संतंतुकामु प्रेतत्वविमुक्तये यान
मलोकप्राप्त्यर्थं द्वितीये ह्नि अद्यय पिंडपूर्वकं पिंडदानं करिष्ये॥ तस्मिन्नेवारमनि

तिलतोयांजुलित्रयं दद्यात् ॥ हविष्यासक्तुनाशायसेन गुडेन वा पिंडदानं कर्तव्यं तथा च स्मृतिः ॥ सा
लिसक्तुना वा पिण्यासेन गुडेन वा ॥ प्रथमेह्नि यद्द्रव्यं तद्देवस्याद्दशाहकमिति ॥ अद्येह स्नादि अमु
कसगोत्रस्यामुकप्रेतस्य चक्षुश्रोत्रनासावयवमुखनिष्पत्त्यर्थं अपानवायुनिष्पत्तये चायं पिंडमुप
तिष्ठतामिति ॥ अवनेजनपूर्वकं दर्भोपरि पिंडं दत्वा तिलोदकं च ॥ अनादिनिधन इत्यादि श्लोकान्
पठेत् ॥ पिंडं प्रवाह्य स्नायात् ॥ एवं सर्वदिनेषु ॥ अथ तृतीयदिनकृत्यं ॥ स्नात्वा संकल्पं कृत्वा अश्मो
॥१८॥ परि तिलांजुलिपंच दत्वा अवनेजनपूर्वकं भ्रूजौ वक्षःस्तनौ ग्रीवा नाप्यान वायुनिष्पत्तये अयं ॥१८॥
पिंड० एवं पूर्ववत्पिंडं दत्वा हविरन्नाघकुर्याद्बदुकृत्वा ॥ गोत्रमुच्चार्य तृतीयेह्नि निर्वपश्राद्धं करिष्ये ॥
पूर्ववत्पिंडदानं विधाय ॥ अनादिनिधन इति पूर्ववत्पिंडं प्रवाहयेत् ॥ अथ चतुर्थदिनकृत्यं ॥
स्नात्वा संकल्पं कृत्वा ॥ अश्मोपरि सप्त तिलांजुलिं दद्यात् ॥ पार्श्वकुक्षिकटिनाभिगुह्यलिंगोरुमयवो
मानवायुनिष्पत्त्यर्थं चतुर्थेह्नि अयं पिंडमुपतिष्ठतु ॥ पूर्ववत्प्रवाहणं ॥ अथ पंचमदिनकृत्यं
स्नात्वा संकल्पं कृत्वा अश्मोपरि नव तिलांजुलिं दत्वा ॥ गोत्रस्य स्याह्युक्तो उरुजानुजंघापादयवनिष्प

त्यर्थं उदानवायुनिष्पत्तये चापिंडार्थं अवनेजनमुपतिष्ठ ॥ पूर्ववत्पिंडप्रवाहनांतं कृत्वा स्नायात् ॥ पुनः
पाकं विधाय ॥ विषमश्राद्धं क्षणादि पिंडप्रवाहनांतं कुर्यात् ॥ अथ षष्ठदिनकृत्यं ॥ स्नात्वा संकल्पं
कृत्वैकादश तिलांजलिं दद्यात् ॥ गोत्रस्येत्युक्त्वा ॥ गुल्फपादांगुलिमर्माद्यवयवनिष्पत्त्यर्थं नाग
वायुनिष्पत्तये च अवनेजनपूर्वकं पूर्ववत्पिंडदानं प्रवाहनांतं कर्तव्यं स्नानं च ॥ अथ सप्तदिनकृत्यं ॥
पूर्ववत्स्नात्वा संकल्प्यांजुलित्रयोदश दद्यात् ॥ गोत्रस्येत्युक्त्वा ॥ अस्थिमज्जाशिरावयवनिष्पत्त्य
र्थं कूर्मसवायुनिष्पत्तये च अवनेजनपूर्वकं पिंडप्रवाहनांतं कृत्वा स्नात्वा विषमश्राद्धं पूर्ववत्कु
र्यात् ॥ अथाष्टमदिनकृत्यं ॥ स्नात्वा संकल्प्यादि पिंडप्रवाहनांतं कृत्वा ॥ पंचदश तिलांजलयः ॥ नख
लोमाद्यवयवकृकरवायुनिष्पत्त्यर्थं स्नानं ॥ अथ नवमदिनकृत्यं ॥ स्नानादिकं पिंडप्रवाहना
तं विशेषः ॥ वीर्यसंभवस्य देवदत्तवायुनिष्पत्तये च अयं० स्नात्वा विषमश्राद्धं पूर्ववत्कर्तव्यं
अथ दशमदिनकृत्यं ॥ निष्पन्नस्य स्थानं गत्वा स्नात्वा तिलांजलयः एकोनविंशतिः ॥ क्षुत्पिपा
सानिष्पत्त्यर्थं धनंजयवायु० पूर्ववत्पिंडदानांतं विधाय ॥ किंचिद्दूरं गत्वा मृद्धात्रिकोणां वे
दीं कुर्यात् गोमयेन संमृज्य हरिद्रादिना रंजयेत् सतत्रजलपूर्णं कुंभं पंचकरस्थापयेत् ॥ तदुपरि
पयोदन्नपिंडं अद्य अमुकसगोत्राया अमुकप्रेताय क्षुत्पिपासानिवृत्त्यर्थं सोदकुंभोयं पिंडं उपतिष्ठतु

३

मध्यमस्तंभे निवेदयेत्॥ प्रेतसखिभ्य इति॥ पूर्ववत्स्तंभे चैव स्वनामयमायेति दक्षिणस्तंभे॥ वायसेभ्य इति प
श्चिमस्तंभे प्रेताधिपतये इति उत्तरस्तंभे पिंडोपरि तिलोदकं दत्वा पादुकापत्रपत्रादि प्रत्येकं ने
भ्यस्तेभ्य उपतिष्ठतामिति दद्यात्॥ ततः पश्चिमदेशस्थ पिंडायावत्क्षपस्तोता वतिष्ठति॥ ततो रमानं
तैले नाभ्युज्य जले क्षिपेत्॥ केचित्प्रेतलमुच्चये दशाहपिंडानि कुर्वंति॥ ततः पुत्रादीनां यथाचारं केशे
श्मश्रुवपनं नखच्छेदनं कर्तव्यं॥ स्त्रीयाश्चेत्तदेव ल्लः॥ आशौचांते कुर्यात् श्मश्रुकर्मणा॥ सोल्लसर्षिपैः॥
॥११॥ स्नाताः शुध्यथास सोपि प्रविशेयुस्तथा गृहं॥ दशमेहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्॥ तत्र त्या
ज्यानि वासांसि केशश्मश्रुनखानि च॥ पुत्रः पत्नी च वपनं कुर्यादंते यथाविधिः॥ पिंडदाता चिन्ये
पि कुर्यादिघ्यस्तमाहितः॥ ततः सर्वे तिलामलकादिस्नानं कृत्वा स्नानं तत्र दिवैव भुंजीत्॥ दिवैवास्ती
सूरितिकास्यायनसूत्रात्॥ इति वैद्यनाथकृतौ प्रेतकांडे दशमादिदिनविधिः समाप्तः॥ अथैकादशा
हे लिख्यते॥ ततः प्रातरुत्थाय मङ्गलानां स्नानं॥ गृहलेपनादि सपिंडाः स्पृष्टवस्त्रस्य दिनं सूर्योदयात्प्रा
गेयमोसलस्नानं कुर्युः॥ तथा च स्मृतिः॥ दशमं पिंडमुत्सृज्य रात्रिशेषे शुचिर्भवेत्॥ सूर्योदये जानेवै ॥११॥
वैधस्नाने॥ ततः पूर्वं पंचगव्यं संपाद्य प्राशनं॥ कर्ताकर्तनमध्याह्ने वृषोत्सर्गं कुर्यात्॥ नाचार्यव
रणा स्वयमेव कर्ता॥ एकादशाहे प्रेतस्य यस्य नोत्सृज्यते वृषः॥ प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्ध
शतैरपि॥ न स्वभर्तृकामरणे वृषोत्सर्गः कर्तव्यः॥ तदुक्तं संग्रहे॥ पतिपुत्रवती नारी भर्तुरग्रे मृ

तायदि॥ वृषोत्सर्गं न कुर्वीत गां दद्यात्पयस्विनीमिति॥ ततो गोष्ठे देवालये नदीतीरे गत्वा
प्राणानायम्य देशकालौ स्मृत्वा॥ अमुकसगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये उत्तमलोकप्राप्तये
वृषोत्सर्गं करिष्ये॥ हस्तमात्रं स्थंडिलं विधाय तदीशानभागे हस्तमात्रां वेदीं कुर्यात्॥ तस्याश्च
तुर्दिक्षु त्रामित्रारवा निधाय तत्पश्चिमे पंचरत्नं वस्त्रगंधैरलंकृत्य कलशमंत्रैः कलशं स्थापयेत्॥
तत्पूर्वदक्षिणपश्चिमोत्तरदिक्षु कलशमंत्रैः भद्रसीत्यादिभिश्चतुर्णां कलशानां स्थापने॥
तत्सुवर्णदक्षिणपश्चिमोत्तरदिक्षु ... वर्हिर्दध्यक्षतपुष्पमालादिभिः अभ्यर्च्य मंत्रेण अम्मय
स्तत्रामालामिति सूत्रेणावेष्टयेत्॥ कुंकुमं गोरोचनम्
वरुणेति च मंत्रैः पूरयेत्॥ कुष्ठं मांसि हरिद्रे द्वे च वचं शैलजं॥ कुंकुमं गोरोचनमु
मुस्तैतामोषधयस्मृताः॥ एताः सर्वौषधीश्च तन्मध्ये क्षिपेत्॥ तत्र मंत्रः॥ या ओषधीः
॥ अ
हिरण्यगर्भः समिति हिरण्यं॥ च्यूतं अश्वत्थवटप्लक्षऔदुंबराणां पंचपल्लवान्॥ अ
श्वत्थेवेति पंचपल्लवान्॥ धान्यमसीति व्रीह्यादिसप्तधान्यं पूर्णाहवींषि च कुंभपूर्णा दवी
ति कलशोपरि निधाय॥ जाफलिनीरिति पूगीफलानि॥ युवा सुवासा इति वस्त्रेण वेष्टयेत्॥ हो
वज्रं मौक्तिकं वैडूर्यं पुष्पराग इन्द्रनीलं तानि पंचरत्नानि॥ परिवाजपतिरिति क्षिपेत्॥ दश्चिता
तवः इति मंत्रेण गंधादिभिरभ्यर्च्य प्रार्थयेत्॥ मंत्रस्तु॥ पुण्यं हि ... नामहातीर्थो

वर्द्धमानं मनोपेतं भवंतु कुलवर्द्धकाः ॥ गंगादिसर्वतीर्थानि मुक्तिक्षेत्राणि सर्वशः ॥ तानि सर्वा
णि कुंभेस्मिन्विशंतु ब्रह्मशासनात् ॥ स्थिरो भवेति हस्ताभ्यां कलशान् स्थिरीकृत्य मध्यमकल
शे रुद्रजपारंभप्रसंगात् रुद्रपूजाविधिं कुर्यात् ॥ नांदीश्राद्धाभावः ॥ तद्यथा ॥ श्रीरुद्रप्रीत्य
र्थं प्रेतमातृपूजां करिष्ये ॥ करालिनि माहाबाहो आवाहिष्ये आवाहयामि ॥ करालिन्यै नमः ॥ गं०
एवं सर्वत्र ॥ भीषणा भद्रा कुंकणा व्याघ्रीमा० भयां उत्कंठा बहुकाली चंडा बालापवेशानं ॥ संक्षि
प्तं प्रणयनं ॥ तंडुलानां तर्पोक्त चरोः सिद्धस्यादासनं ॥ क्षीरेण पायसश्रपणं ॥ समिद्राधानां तंचि
धायाज्येन षडाहुतीर्जुहुयात् ॥ रुद्र हरनिस्वाहा ॥ रुद्र पशुपतये ति चतुर्णां द्वयोर ग्नयरुनि स्वाहा ॥
रुद्रमग्नयरुनि सर्वेषां ॥ रुहरेमध्ये स्वाहा ॥ रुद्रहध्नी स्वाहा ॥ रुद्रहस्तघ्नी स्वाहा ॥ उपस्थे जघर
णं० दिधर स्वाहा ॥ रायस्पोषमस्मासु दीधरत्स्वाहा ॥ ६ ॥ आज्यभागाविष्टापायसेन तेनाहु
तीर्होति ॥ अग्नये स्वाहा ॥ पथादेवस्वाहा ॥ रुद्राय स्वाहा ॥ शर्वाय स्वाहा ॥ पशुपतये स्वाहा ॥
उग्राय स्वाहा ॥ अशनये स्वाहा ॥ भवाय स्वाहा ॥ महादेवाय ॥ ईशानाय ॥ ततः पोष्ण चरुम

॥२०॥ ८ ॥१२॥

भिघार्य ॥ पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः ॥ पूषा वाजं सनोतु नः स्वाहा ॥ इदं पूष्णे न मम ॥
पायसशेषको श्चर्वो स्विष्टकृत्साने वा हुतिर्जुहुयात् ॥ होमशेषं समाप्य रुद्रं जपित्वा मंडपाद्ब
हिः रक्तं च तंत्रस्त्रीभिः वत्सतरीभिः द्वाभ्यां वैकया या युतं सर्वांगोरूपेन मेध वर्णं यारोहितं यारूप
स्वि— तमद्भतजीव वत्सायाः पयस्विन्याः पुत्रमयमुत्साविशिष्टं वृषं पश्चिमद्वारेणामंडपमध्ये आनी
य वेदीपुरतस्थापयेत् ॥ कासायनसूत्रे श्चेतस्याः वत्सतर्योः द्वे वैकावा ॥ तथा च स्मृतिः ॥ चतस्रो
वत्सतरीभ द्वैकासंभवेपि वेति ॥ यत्तुपंचैति ॥ वृषोत्सर्जने वेलायां वृषाभावे कथं चन ॥ म
ध्यः पिंडैश्च दर्भैश्च वृषं कृत्वा विमोचयेत् ॥ नरा श्वयतेर्वृषोत्सर्गो होमं वा न तु कारयेत् ॥ तन्नि
[illegible]मिति निर्णयसिंधौ ॥ ततो वत्सरिमध्यस्थापं च पल्लवयुक्तं कुंभशागर्हीत्वा कलशोदकैः
वृषमभिसिंचेत् ॥ आपोहिष्ठेति तिसृभिः ॥ वीतारमिंद्रेति पुंचेन्द्रैः ॥ इमं मे वरुणेति पं
चतसृभिः आप्यायस्वेति पंचतःघः लोमिद्धिहवामहे इति वामदेव्येन ॥ यद्वा देव हेडन
मिति कूष्मांडैः शन्नोदेवीरिति पुण्यमंत्रै रभिषिंचेत् ॥ ततो वृषभस्य वामकटिभागे

कुंकुमेन चक्रचिह्नं कृत्वा दक्षिणबाहौ त्रिशूलं विदध्यात्॥ वृषभमंत्रं कथयेत् लोहकारं प्रतिदद्यात्
ततो लोहकारस्तु लोहेनाग्नितप्तेनांकयेत्॥ स्व च मंत्रो कथयेत्॥ ततो वृषदेहे रुद्रैकादशनामा
नि न्यासं कुर्यात्॥ तत्रायं क्रमः॥ अघोराय नमः इति दक्षिणपादे॥ पशुपतये॰ वामपादे॰ श
र्वाय॰ दक्षिणजानुनि॥ विरूपाय॰ वामजा॰ विरूपाय॰ दक्षकट्यां त्र्यंबकाय॰ वामकट्यां॥ क
पर्दिने नमः दक्षिणकुक्षौ भैरवाय॰ वामकुक्षौ शूलपाणये॰ दक्षिणनासिके ईशानाय॰ वा
मना॰ महेशाय॰ मूर्ध्नि एवं न्यासं विधाय॥ वृषं रुद्ररूपं ध्यात्वा॥ वत्सतरीणां नामानि कुर्यात्
॥२२॥ तत्र क्रमः॥ पार्वत्यै नमः॥ कालिंद्यै॰ कोटव्यै॰ देवपत्न्यै अनेनैव क्रमेण॥ अथ वत्सतरीन्या ॥२४॥
सः भागवत्यै नमः इति दक्षपादे उमा॰ वामपा॰ शंकरप्रियायै॰ दक्षजानुनि॥ पार्वत्यै॰ वा
गौर्यै॰ दक्षकट्यां॥ कात्यायन्यै॰ वा॰ कालिंद्यै॰ दक्षकरे॥ कोटव्यै॰ वामक॰ विश्वधारिण्यै
दक्षिणनासा॥ गंगायै न॰ वाम॰ शिवराज्ञ्यै॰ मूर्ध्नि॥ इति वत्सतरीणां प्रत्येकं न्या
सं विधाय वृषवत्सतरीणां ललाटे कुंकुमेनार्धचंद्राकृतिं तिलकान् कुर्यात् तस्योप
परि गंधाक्षतैः रक्तं कुर्यात्॥ वत्सतरीणां सिरसि सिंदुरं चोपलिप्य॥ वृषभस्य कर्णे

पितानोसि मंत्रं जपेत्॥ ततो वृषं प्रार्थयेत्॥ नंदिनीकुलसंभूतो वृषरुद्रवाहनः॥ गवां कोटिसह
स्राणां तासां त्वं वृषभस्तथा॥ पितृमातामहानां च मातामहास्तथैव च॥ रौरवे नरके चैव तेषां रक्षाग
वांपते॥ धर्मस्त्वं वृषरूपेण जगदानंदकारकः॥ अष्टमूर्तेरधिष्ठानमतः पाहि सनातनः॥ इति
वृषभं संप्रार्थ्य॥ जय जय भगवान्माहादेववृषस्कंधे वंदेत्॥ ततः कृत्वा वत्सतरीणां समीपं गत्वा पठेत्॥ व
त्सतर्यो रूपवत्यः पतिर्वो बलिनं शुभं॥ हास्यामि ते न सहिताः क्रीड्यध्वं हृष्टमानसा इति॥ वृषभं गत्वा
वृषोसि भगवान्धर्मश्चतुःपादः प्रकीर्तितः॥ वृतां गत प्रार्थयाम्यहं भक्त्या स मां रक्षतु सर्वतः इति॥ प्रार्थनं
कृत्वा प्राणानायम्य देशकालौ स्मृत्वा अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये स्वर्गलोकप्राप्त्यर्थं
वत्सतरीसहितं वृषोत्सर्गं करिष्ये॥ इति संकल्प्य सकुशजलं गृहीत्वा भूमौ क्षिपेत्॥ एवं युवानं प्र
तिवो ददामि तेन क्रीडंतीश्चरथ प्रियेण॥ मा नः साप्त जनुषा सुभगा रायस्पोषेण समिषा मदेम॥
स्वस्त्यस्त्वेनत्॥ वृषस्य दक्षिणपादे वत्सतरीणां वामपादे कंकणबंधनं॥ ततश्च वृषं वत्सतरीमध्ये कृ
मयोभूरिति सकुक्रकरो बेणा॥ शिमेत्रायै त्रामया भूरा भिमा वाहि स्वाहा॥ मारुतोसि मरुतमिषा

रभ्यस्वर्णं ज्योतिस्याहास्यलोस्त्रयीयस्यादत्तं दत्तो नुवाकत्रोषः॥ तेवायजमानः स्याच्चांतःपवि
त्रपाणिः प्राणानायम्य देशकालौ स्मृत्वा वृषोत्सर्गांगभूतं देवऋषिमनुष्यपितृतर्पणमहं करिष्ये॥ इति
संकल्प्य दक्षुरवाक्स्वाहादेवतीर्थेन पुच्छोपरि मंत्रानेदेवपत्न्यः मातरः मतस्मृताः॥ दिक्पाल
लोकपालाश्च ग्रहदेवाधिदेवताः॥ तेसर्वेतृप्तिमायांतु। नीलपुच्छेनुतर्पिताः॥ विश्वेदेवास्तथा
साध्यास्तथा मरुद्गणाः॥ सप्तद्वीपनिवासिताव्यं नद्यश्च सागराः॥ तेसर्वेतृप्तिमायांतु वृषपुच्छवुत
र्पिताः॥ पाताले नागपत्न्यश्च नागाश्चैव तु सर्वतः॥ पिशाचाश्गुह्यकाः अप्सरागणगंधर्वाराक्षसाः॥
तेसर्वे तृप्तिमायांतु नील॥ पृथिव्यापस्तथा तेजो वायुराकाशमेवच॥ दिविभुव्यंतरिक्षं चयेच
पातालवासिनः॥ तेसर्वे॥ कपिलः शेषनागाश्च लक्ष्मीनंतएववगते सर्वे॥ अन्येजलचराजी
वाअसंख्यानास्तनेवकेशोः॥ चतुर्दश यमाश्चैव येचान्ये यमकिंकराः॥ तेसर्वे॥ यक्षाः रक्षांसि
राजानः पक्षिणः पशवः स्तथा॥ स्वेदजाउद्भिजाजीवाअंडजाश्चजरायुजाः॥ शांतिदाशु सदा सं तु
वृषपुच्छेचतर्पिताः॥ इतितर्पणं विधायापसव्यं कृत्वा दक्षिणाभिमुखः पितृतीर्थेन वृषपुच्छोप
रि नामगोत्रोच्चारपूर्वं वंश्यपितृतर्पणं विधाय श्लोकरूपमंत्रैश्च तर्पणं कुर्यात्॥ नत्रायं क्रमः॥

आब्रह्मस्तंभपर्यंतं येचान्ये गोत्रिणस्तथा॥ तेसर्वे तृप्तिमायांतु वृषपुच्छपितर्पिताः॥ आमगर्भाम
तायेच शास्त्रपातमृताश्च ये॥ संस्काररहितायेच चौरव्याघ्रादिघुगामिनः॥ तेसर्वे॥ सर्पव्याघ्रहतायेच
शृंगीदंष्ट्रीजलादिभिः॥ अपुत्राश्च अक्रियायेच। चअदारा धर्मवर्जिताः॥ तेसर्वे॥ आब्रह्मस्तंभपर्यंतं दे
वर्षिपितृमानवाः॥ तृप्यंतु पितरः सर्वे मातृमातामहादयः॥ अतीतः कुलकोटीनां सप्तद्वीपनिवासि
नां॥ आब्रह्मन्भुवनाल्लोकादिदमस्तु तिलोदकं॥ पितृवंशे मृतायेच मातृवंशे चयेमृताः॥ गुरुश्व
सुरबंधूनां येचान्ये बांधवास्मृताः॥ तेसर्वेति॥ मातृपक्षश्च येकेचित्येवायेपितृपक्षजाः॥ गुरु
श्वशुरबंधूनां कुलेयेचसमुद्भवाः॥ येप्रेतत्वमापन्ना येचान्ये श्राद्धवर्जिताः॥ वृषोत्सर्ग
णतेसर्वे लभंतां गतिमुत्तमां प्रीति॥ ततो लोहकारमाहूय तस्मै ताम्रकारवं येतनं दद्यात्॥ ततो व
दुलतोयतले गोसमूहे वत्सरीसहवृषं क्षिपेत्॥ ततो वृषोत्सर्गतानिवर्जयेन वनेयनकेना
पियकिंचिदुत्सृष्टं तद्धेन सर्वप्रकारेण संरक्षणीयामिति॥ अन्याकौब्राह्मणाः प्रतिवक्तव्यं॥
ब्राह्मणेगोपिं प्रतिवक्तव्यं॥ ततो गोपतो निष्क्रांते ब्राह्मणे स्वस्तिवाचनं कारयित्वा तेभ्यो दक्षिणां दद्यात्॥

२२

कलशांश्च॥ इति वृषोत्सर्गः॥ तस्मिन्नेव दिवसे शिष्टं विषमश्राद्धं कुर्यात्॥ तदेकोद्दिष्टविधि
ना॥ पाकेनैवाशौचनिःसृते ब्राह्मणे पावके वा कुर्यादिमं तत्र तत्॥ स्मृतिरपि॥ नवश्राद्धममंत्रं च वि
डोदकविवर्जितमिति॥ पिंडोदकं शुद्धिदिनमित्यादि॥ लघुहारीतः॥ एकोद्दिष्टं तु कुर्वीत पाकेनै
व सदा स्वयं॥ अभावे पाकपात्राणां तदहः समुपोषणमिति॥ गोभिलः॥ ब्राह्मणं भोजयेदाघ्रा
तव्यमन्नलेथवा॥ कृतन्नश्च भोजयेद्विप्रान्दिवसे नैवेदितं॥ तत्राग्निपरिसंस्तरणं संस्कारपू
र्वकं अग्निस्थापनं॥ ततः आचम्य प्राणानायम्य देशकालौ स्मृत्वा गोत्रस्य प्रेतस्य प्रेतत्वावि
मुक्तये उत्तमलोकप्राप्तये नवश्राद्धमेकोद्दिष्टविधिनाहं करिष्ये॥ तत्र सपिंडीकरणा
त्प्राक् एकोद्दिष्टेषु अर्घ्यादिदानपदार्थान् दर्शयति॥ वृद्धरत्नावल्यां॥ आदौ पाद्यं द्विगुणादर्भो
जयेच्छिरः स्मृतिवाक्यं॥ पितृश्राद्धः ससंबंधरामंत्रश्चस्तथैव च॥ पात्रालंभोवगाहश्च उल्मु
को लेखनादिभिः॥ पितृप्रश्नश्च विकरं नोपप्रश्नस्तथैव च॥ प्रदक्षिणा विसर्गोन्ते सीमं
तगमनं तथा॥ अष्टादशपदार्थाश्च प्रेतश्राद्धे विवर्जयेत्॥ इति॥ २॥ ततो गो० प्रे० नवश्राद्धे

२३

प्रेतस्थाने ब्राह्मणमामंत्रयेत्॥ आमंत्रितो स्मीति प्रतिवचनं॥ गोत्र० प्रे० इदं तेपाद्यं॥ गो० प्रे० आस
नं॥ अर्घ्यपात्रे जलतिलयवान् पवित्रं चैकं क्षिपेत्॥ गो० प्रे० एष ते अर्घ्य उप० अस्मिन्नु सर
रेगंधादिदानं॥ अग्नौकरणाभावः॥ नाग्नौकरणमित्युक्तत्वात्॥ ततोन्नपरिवेषणं॥ तत
ब्राह्मणं गायत्र्या॥ इदमन्नं यथोपस्कारं गोत्राय प्रेतायउप०॥ आचमनीयं विप्रकरे दद्यं॥
ततः प्राणाय स्वाहेत्याद्याहुत्या ब्राह्मणप्रेहो भवति॥ अग्निपक्वेतु संकल्पितस्यान्नस्य उद्दी
रने सर्वाभिः गिरः प्रणवाद्यैः स्वाहाकारांतैश्चतुराव्रत्या द्वात्रिंशद्ग्रासा होतव्याः॥ तृप्तान् ज्ञा
त्वा विप्रकरे जलं दद्यात्॥ उच्छिष्टसंनिधौ रेखाकरणोल्मुकं विना पिंडदानं कुर्यात्॥ गो० प्रे०
इदं ते एकोद्दिष्टश्राद्धीयमन्नमुदकं चोपतिष्ठतां॥ अस्मिन्नन्नदत्याद्यनेपदानं॥ तद
थ॥ आसनोपान होच्छत्रं मुद्रिकाचकमंडलु॥ भोजनं भोजनाधारो च स्वान्यषड्विधं पदं॥
एकोद्दिष्टश्राद्धसाद्गुण्यार्थं इदमाद्दक्षिणा उपतिष्ठतां॥ इत्येकोद्दिष्टं॥ एतस्यैव नाम रुद्र
कोद्दिष्टमाद्यमासिकमिति॥ यत्र दशाद्यादानं॥ भविष्ये॥ तस्मात्षष्ठ्या समासाद्यमासरुद्र

मयां दद्यां ॥ दंतपत्रापचितां रम्यां हेमपट्टैरलंकृतां ॥ हंसतूलीप्रतिच्छन्नां शुभे गंडोपधानिकां ॥
प्रच्छादनपटीयुक्तां गंधधूपादिवासितां ॥ तत्र संस्थापयेद्धैमं हरिं लक्ष्म्या समन्वितं ॥ अत्र हरिस्था
ने प्रेतं ॥ उच्छीर्षके घृतभृतं कलशं परिकल्पयेत् ॥ तांबूलं कुंकुमक्षोदकर्पूरागरुचंदनं ॥ दीपको
पानहच्छत्रं चामरासनभाजनं ॥ पार्श्वेषु स्थापयेद्भक्त्या सप्तधान्यानि चैव हि ॥ मंत्रः ॥ यथा न कृ
ष्णशयनं शून्यं सागरजातया ॥ शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ॥ यस्मादशून्यं शयनं
केशवस्य शिवस्य च ॥ अदत्तं तु न देवानां ह्येवं तस्य सर्वलं प्रणिपत्य विसर्जयेत् ॥ एकादशाहे पित
थाविधिरेषः प्रकीर्तितः ॥ इति शय्यादानविधिः ॥ अथ शय्यादानं ॥ आचम्य प्राणानायम्य ति
थ्यादि संकीर्त्यामुकगोत्रस्यामुकप्रेतस्याप्सरोगणसेवितविमानेन स्वर्गपुरगमनार्थं आभूत
संप्लव स्वर्गवसार्थं सोपकरशय्यादानं सकलवस्त्रकांचनपुरुषदानं चाहं करिष्ये इति संकल्पं कृ
त्वा निर्विघ्नार्थं गणपतिपूजानंतरं भूर्भुवः स्वः कांचनपुरुषेहागच्छ इह तिष्ठेति शय्यायां कांचनपुरु
षस्थापनं ॥ तच्छिरःप्रदेशे अश्वत्थपत्रं ॥ स्थापनं ॥ तत्पार्श्वे तांबूलं कुंकुमक्षोदकर्पु

२४

रागरुचंदनादिदीपिकोपानहच्छत्रचामरासनभाजनानां सप्तधान्यानां च स्थापनं ॥ यथा
पादुकायुगलकरकपंचवर्णवितानं स्थापनं ॥ ततो सोपकरणशय्यायै नम इति गंधा
द्युपचारैः शय्यापूजनं ॥ तथैव नाममंत्रेण कांचनपुरुषपूजनं ॥ ततः द्विजदंपती गंधादि
भिः संपूज्य शय्यायामुपवेशयेत् ॥ ततः द्विजदंपतीभ्यां नम इति मधुपर्कदानं सशाकु
न्नात्रयतिलजलान्यादाय अमुकगोत्रस्यामुकप्रेतस्याप्सरोगणसेवितविमानेन
स्वर्गलोकगमनार्थं आभूतसंप्लवं स्वर्गवसार्थं चेमां सोपकरणां शय्यां विष्णुदैवतां
इमं सफलं सवस्त्रं सहितं कांचनपुरुषममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं
संप्रददे ॥ इति प्रतिशय्यां प्रेतस्य प्रतिमां शय्यायां स्थापयेत् ॥ सर्वरत्नसमायुक्ता
प्रसीदत्विति मंत्रेण ब्राह्मणहस्ते दद्यात् ॥ ओं ब्राह्मणस्तु विप्र प्रतिगृह्णामि ॥ ओं स्वस्ति स
कलो हरिरिति पठेत् ॥ ततो दानस्य सांगतासिद्ध्यर्थं हिरण्यदक्षिणादानं स्त्रीणां शयने तत्र
ओस्तनमंजनं कंकणं च नीचतस्मै ब्राह्मणाय दद्यात् ॥ प्रतिगृह्य ब्राह्मणानंतरं ब्राह्मणस्तु

२५

मुहूर्त्तमात्रं शय्यायां विश्रम्य स्वगृहं गच्छेत्॥ शय्यादानप्रभावेन प्रेतो मुच्यते बंधनात्॥ अपि
पापसमायुक्तः स्वर्गलोकं स गच्छति॥ इति शय्यादानविधिः॥ अथ मासिकान्युच्यंते॥ तानि
च मासिकानि द्वादशमासेषु षोडश भवंति॥ यथा॥ मरणमासादारभ्य संवत्सरप्राप्तिपर्यंतं प्र
तिमासं विधीयमानानि द्वादश मासिकानि॥ ऊनमासिकत्रिपक्षिकोनषण्मासिकं चेति॥
न द्वादश जातूकर्ण्यः॥ द्वादशप्रतिमास्यानि आद्यषण्मासिके तथा॥ त्रैपक्षिकाद्यूनं चेति श्रा
द्धान्येतानि षोडश॥ इति॥ अत्र द्वादश प्रतिमास्यानि संनिधानादाद्यषण्मासिकमूनाब्दं
श्राद्धमूनमासिकमूनषण्मासिकमूनाब्दिकं परः॥ अत्रोनमासिकादि त्र्यूनमासादिषु कार्या
णीत्युक्तं॥ तल्लिंगं यद्विरिंदनैरूनेषु कार्याणी सत्रोच्यते॥ नरदिंगालवः॥ त्रिभिर्वादिनसैरूने
नैकेनैकेन वा॥ आद्यादिषु च मासेषु कुर्यादूनाब्दिकं तथेति॥ एतानि षोडश श्राद्धा
नि सपिंडीकरणात्पूर्वमेकोद्दिष्टविधिना कुर्यात्॥ स्मृतिरपि॥ श्राद्धानि षोडशादत्त्वा नै
व कुर्यात्सपिंडनं॥ षोडशश्राद्धकरणे सपिंडीकरणेऽधिकाराभावात्॥ सपिं
डीकरणादूर्ध्वमनुमासाब्दिकं वत्॥ पार्वणमेकोद्दिष्टं वा॥ यथाचारं कुर्यात्॥ तथा

२५

ह्यैष्टि न सि॥ सपिंडीकरणादर्वाक् कुर्याच्छ्राद्धानि षोडश॥ एकोद्दिष्टविधानेन कुर्यात्सर्वाणि
तानि तु॥ सपिंडीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः॥ प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स
तान्यपि॥ इति॥ अत्रापि आदिमासिकमेकादशाहे कुर्यात्॥ तदुक्तं यमेन लघुना॥ मृतेऽहनि
तु कर्तव्यं प्रतिमासं तु वत्सरं॥ प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि॥ अत्र प्रतिमासं प्र
तिसंवत्सरं चेत्यभिधानादाद्यमेकादशेऽहनीत्युक्तत्वादाद्यमासिकमाद्याब्दिकं चैकादशेऽहनि
कुर्यात्॥ मनेनापि प्राणेशाभिलोव्यक्तस्यैकादशेऽहनि मासिकं॥ ब्राह्मणभोजनं यदाद्यं हन्त
व्यस्यैकादशाह इति वचनाच्चेति॥ अथ प्रयोगः॥ स्वाचांतः षोडशब्राह्मणान्निमंत्र्य तत्र आध्या
त्रिकैः षोडशश्राद्धान्यादायादान्तेन मात्रभेदं कृत्वा क्षेपक्रमं कुर्यात्॥ तद्यथा कौ
आमान्येन॥ अद्येहामुकगोत्र० प्रे० द्वादशाहे सपिंडीकरणार्थमपकृष्य एकादशेऽहनि
द्वादशे षोडशश्राद्धानामान्येन वा एकोद्दिष्टविधिनाऽहं चेत्करिष्ये॥ तत्रामुकगोत्र० प्रे० आ
द्यमासिकश्राद्धे क्षण उपतिष्ठतु॥ गोत्र० प्रेत ऊनमासिकश्राद्धे क्षणमुपतिष्ठतु॥

गोत्र॰ प्रेत॥ द्वितीयमासीकश्राद्धे क्षणसुपतिष्ठतु॰ गोत्र॰ प्रेत॰ त्रैपक्षिकश्राद्धे क्ष॰
गोत्र॰ प्रेत॰ तृतीयमासिक॰ क्षण॰ गोत्र॰ प्रेत॰ चतुर्थमासिक॰ गोत्र॰ प्रेत॰
पंच॰ क्षण॰ गोत्र॰ प्रे॰ षण्मासि॰ ८ गोत्र॰ प्रे॰ ऊनषण्मा॰ ९ गोत्र॰ प्रे॰ सप्तम॰ १० गोत्र॰ प्रे॰ अष्टम॰ ११
गोत्र॰ प्रेत॰ नवमा॰ १२ गोत्र॰ प्रेत॰ दशम॰ क्षण॰ १३ गोत्र॰ प्रे॰ एकादश॰ क्षण॰ १४ गोत्र॰
प्रेत॰ द्वादश॰ क्षण॰ १५ गोत्र॰ प्रे॰ ऊनाब्दिकश्राद्धे क्षणमुपतिष्ठतु॥ १६ इति षोडशश्राद्धा
नि यद्वा सपिंडीकरणं संवत्सरे भवति तदा स्वस्वकाले भवंति॥ चेन्मरणमासाद्द्वादशमा
साम ध्ये मलिनमासस्तदा तन्मासिकं द्विवारं कार्यं॥ एवं सप्तदश श्राद्धानि भवंति॥ एवं आसना
दि दत्वार्घपात्राणि गंधपुष्पादिनार्चयेत्॥ ततोऽन्नपरिवेषणादि जलदानांतं कृत्वा पिंडदानं कु
र्यात्॥ अक्षय्योदकदानं च॥ दक्षिणा॥ कालकर्त्तव्यं वचा मंत्रेण कार्याणि॥ पितुराशौचमध्ये माता
यदि म्रियेत यथा मातुराशौचमध्ये म्रियते पिता तदनंतरः पितुराशौचांते मातुः पक्षिणी कुर्यात्॥
इतरः पितुराशौचेन शुद्धिः॥ शंखोऽप्याह॥ माता यदि प्रमीता यामनुशौचे म्रियते पिता॥ पितुः

शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणी॥ इति॥ मातुः पक्षिणीमध्ये पितुरेकादशाहं कुर्यात्॥ त
था च स्मृतिः॥ आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनीति॥ इति वैद्यनाथदीक्षितीये प्रेतकार्यामृत
[illegible] संपूर्णं॥ ॥अथ सपिंडीकरणं॥ स्मृतिमहात्रस्याशौचलान्यवंति॥ कास्ता य
त्र मन्त्राः पकालाः॥ तदुक्तं कात्यायनेन॥ एकादशो द्वादशो वा त्रिपक्षे त्रिमासिके च॥ षष्ठे चैकादशे
वाब्दसंपूर्णे वा शुभागम इति॥ अदैवाविवाहादिषु तेषु द्वयं प्राप्तं ततः पूर्वं सपिंडीकरणं कु
र्यादित्यर्थः॥ कात्यायनसूत्रं॥ संवत्सरे पूर्णे त्रिपक्षे वा द्वादशाहे वा यदहर्वा वृद्धिरापद्येतेति॥
एष चैकादशाहरूपः कालः कर्त्तरि पुत्रे साग्नौ एकादशाह एव सग्निदहे स्यात्॥ तदाह कार्ष्णा
जिनिः॥ सपिंडीकरणं कुर्यात्पूर्वं वह्नाग्निमानसतः॥ परतो द्वादशाहात्तु कुर्याद्वा परोनिरग्निः
दिवारात्रौ स्यादेकादशेऽह्नि सर्वं॥ इतरेण निरग्निकः॥ न वृद्धिवस्त्रकेऽपि॥ प्रथमा स्यादमावा
स्यामृता द्वादशाहे इति॥ सपिंडीकरणं तत्र कुर्यादेव सुतोऽग्निमान् [illegible] ति॥ अत्रापि पं
चमीमपी कार्या॥ मृताहादूर्ध्वं दिनमारभ्येत्यर्थः॥ साग्नेर्वा द्वादशेऽन्हि दर्शपातेऽपि इ
त्यर्थः॥ अथ पूर्वं सपिंडीकरणविधानं॥ प्रेते साग्निगोत्रपुत्रे कर्त्तरी अनग्निमिति द्वादशाहेऽपि कालाः॥

तदुक्तं भविष्ये॥ यजमानोग्निमान्राजन् प्रेतश्चानग्निमान्भवेत्॥ द्वादशाहे तथा कार्यं सपिंडी-
करणं सुतैरिति॥ यजमानः कर्त्ता कर्त्तव्येनाग्नौ प्रेते चाहिताग्नौ तृतीयः पक्षः कालः॥ त-
दाह सुमंतुः॥ प्रेतश्चेदाहिताग्निः स्यात्कर्त्तानग्निर्यदा भवेत्॥ सपिंडीकरणं तस्य कुर्यात्संव-
त्सरीयकादिति॥ अनग्नीनां तु द्वादशाहादयः सर्वे कालाः भवंति॥ परीनरहस्यनग्नेः सर्वत्राद्वादशाहपू-
र्वे कपर्दिभिर्वचनात् सपिंडीकरणविधाना कथं समकालमिति चेत्सत्यं॥ सर्वत्र मु-
ख्यकालः॥ तत्र देशकालादिस्थानिश्चयात्॥ द्वादशाह एव कार्यं॥ तदाह व्याघ्रः॥ आ-
नंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात्॥ अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्य-
ते॥ इति द्वादशाहेत्वसपिंडीकरणं कार्यं॥ अत्र प्रयोगः॥ देवश्राद्धवत् पित्राद्यर्थं प्रेता-
र्थमेवं निमंत्रयेत्सर्वं पूर्ववत्॥ अपरेद्युर्ब्राह्मणानां स्वकर्माभ्यंगं कारयित्वा त्वाद्यमार-
भेतु॥ अद्य सांवतिथौ॥ प्रे॰ प्रेतलोकासैन लोकप्राप्त्यर्थं अमुकगोत्रामुकशर्मणि
वसुरुद्रादित्यस्वरूपः पितृपितामहप्रपितामहैः सह सपिंडीकरणं पार्वणैकोद्दिष्ट-
विधिनाहं करिष्ये॥ तत्र कालकामसंज्ञकौ विश्वेदेवानां क्षणे स्नामहमामंत्रये॥

आमंत्रितोस्मि॥ एवं द्वितीयब्राह्मणे॥ अमुकगोत्रस्यामुकशर्मणः पितामहस्य क्षणे
स्नामहमामंत्रये॥ आमंत्रयेतोस्मि॥ एवं प्रपितामहस्य॥ गोत्रस्य॰ प्रेतस्य॰ प्रेतस्था-
ने क्षणमुपतिष्ठतु॥ एवं ब्राह्मणविन्यासं स्तनस्थानानुरोधेन लिख्यते॥ त्रिणि पि-
तृणामेकं प्रेतस्येति॥ अमुमेव क्रमं शातातपोप्याह॥ सपिंडिकरणं श्राद्धं दे-
वपूर्वं नियोजयेत्॥ पितॄनेवाशयेत्तत्र पुनः प्रेतं च निर्दिशेत्॥ एवं कारो मा-
तामहष्वपि दैवे दार्थः॥ अन्यच्च॥ स्नापिंडं पितृभ्यस्तु पश्चात्से तापयाश्वेत॥
तं तु पिंडं त्रिधा कृत्वा॥ अनुपूर्वाच्च संततमिति॥ तस्मात्सश्राद्धे कोदिष्टे एवं श-
व्यतेनैवासनादि दद्यात्॥ कालकालसंज्ञकौ दैवं देवानावाहयिष्ये॥ आवा-
हयेत्यनुज्ञातः॥ विश्वेदेवास आगतेति मंत्रेणावाह्य॥ विश्वेदेवाः शृणुतेमं
इति जपेत्॥ अमुकगोत्रान् पितामहप्रपितामहयद्धप्रपितामहान् अमुको
अमुकशर्मणः वसुरुद्रादित्यस्वरूपान् आवाहयिष्ये॥ आवाहयेत्यनु

२८

तात: उच्छन्न स्येसावा स्वावृत्तीर्थतिलान्॥ आयंतुन इतिजपेत्॥ प्रेत ब्राह्मणे नावाहनं नाग्नौकरणं नाच
विश्वेदेवास्वदितमिति तृप्तिप्रश्नं उपतिष्ठतामिसहस्य स्थाने अभिरम्यतामिति विसर्गः इत्येकोदिष्टं॥
देवार्थमर्घ्यं प्राग्ग्रं॥ पित्रार्थं दक्षिणसंस्थितं॥ दक्षिणाग्रान्॥ नर्घ्या स्थापयेत्॥ प्रेतार्घ्यमु
कं तदग्रे स्थापयेत्॥ तत्र कुशाश्चतुष्टयं चाप्सपवित्रेष्वर्घ्यपात्रेषु शन्नोदेवीरित्येभिस्मित्रप आ
सिंचत्तिला एकैकस्मिन्नेवतिलान्नावपति तिलोदकमिति लोमीतिमंत्रेण॥ एवं सति लोदकगंधो
दकानि सर्वाणि पात्राणि पूरयित्वा आद्यि ब्रवीतिपठितोकालकाम संज्ञिका विश्वेदेवा एष वो
र्घ्य इति प्रयोगेण देव ब्राह्मणहस्ते सपवित्रं दूर्घ्यं सशेषं क्षिपेत्॥ अस्त्वर्घ्य इति प्रतिवच
नं॥ एवं द्वितीय ब्राह्मणे॥ एवमेव प्रयोगेन गोत्रोच्चार पूर्ववंतस्मिन्नादि त्रयाणां सशेषमर्घ्यं
दद्यात्तथैव प्रेत ब्राह्मणार्घ्यजलं हस्तावशिष्टं जलं तत्साच जलैः सह संयोजयेत्॥ तथैवस्म
द्विप्रेतपात्रेपि तत्पात्रे चासिंचतीति॥ प्रेतशब्दमात्रं चतुर्थः पुरुष उत सघामत इति
प्रक्रमेणाइलः प्रेत इति श्रुतिः सहपुनर्नागमना चतुर्थ एव॥ वृद्धयाज्ञवल्क्यापाह॥ वृद्ध
प्रपितामह पिंडं त्रिधा कारयेद्बुधः॥ प्रक्रमेणागतः प्रेतो न पिता प्रेतउच्यते॥ वृद्धस्यैवतु

पत्राचं तत्सिंचेत्प्रपितामहे॥ नत्सुते शिंचयेत्सुनरिति॥ एवं चतुर्थस्य च्युत्क्रमेणासिं
चनं दृष्टं सघामतपात्रेणापि दृष्टस्मात्स्यं नरा दृ॥ युशिष्टः॥ तथा तिनार्घ्यपात्रं चपरि
कीर्त्तनेपितृपात्रेषु सपिंडिकरणं तु ततः॥ प्रेतपात्रोदकं पिंडमित रेषु नियोज
येत्॥ त्रिधा कृत्वा क्रमेणैव सपिंड्य तु निरग्निकमिति॥ प्रेतपात्रेन यमतत पात्रोद
कं इतरेषु पितामहादिपात्रेषु उभयत्रानादिकल्प इति चेन्न॥ अस्य दोषमन्यत्तत्रा
तत्रैव व्यवस्था॥ साग्निककार्ताचेच्चतुर्थस्यैवार्घ्यपिंडे त्रिधा कृत्वा सपिंडनं
कुर्यात्॥ निरग्निकः कुर्वीत तु सघामतार्घ्यपिंडे त्रिधा कृत्वा कृते स्याविरोधः तत्र
प्रयोगः॥ अमुकसगोत्रामुक प्रेतपात्रोदकं अमुकसगोत्राणां अमुकामुकां
मर्गणां प्रेतस्य पीतृ पितामहप्रपितामहानां अर्घ्यपात्रोदकेन सह संयोजयामि
पात्रसंयोजने त्पुनस्तानतः प्रेतपात्रस्थकुशत्रयं पितृपात्रत्रये दत्त्वा प्रेतपात्रयं
सयोजयेत्॥ तथा॥ अमुकस्य गोत्रामुक स्यप्रेतामुकसगोत्रे णामुकशर्म
प्रपितामहेनासहसास्य युज्यगच्छ तु॥ ये समानामिति द्वाभ्यामृग्भ्यां तानः समाः

२८
र ८

एवं प्रपितामहस्य वृद्धप्रपितामहयोः । ततः पित्रादित्रिकेभ्यो मिश्रीतस्वस्वपात्रोदकेन पार्व
णचरुं दत्वा पितृभ्यः स्थानमसीति मंत्रेण पितामहादिजयामभागेनानुर्वं कुर्यात् ॥
अस्मीन्काले पुष्पधूपदीपवाससां च प्रदानं तत्र प्रयोगः ॥ कालेकामसंज्ञकाविश्वेदेवा एतेन
गंधपुष्पधूपवाससांसि वासोनिष्क्रयीभूतं हिरण्यानि वा वः संप्रददे न मम ॥ अमुकस्य गो
त्राः अस्मत्पितामहप्रपितामहवृद्धप्रपितामहाः अमुकामुकशर्माणो वसुरुद्रादित्यस्वरू
पाः एतानि पुष्पधूपदीपवासांसि निष्क्रयीभूतं हिरण्यानि वा वः संप्रददे न मम ॥ अमुकस्य गो
त्राः अमुकस्य पत्नीः गंधा हिरण्यानि तेऽपि ० ततो घृताक्तमन्नमादाय हिस्वाऽग्नौकरणं क
रिष्ये इति पृच्छेत् । कुरुष्वेत्यनुज्ञातः पार्वणचरुं च दाव सव्येऽग्नये कव्यवाहनाय स्वाहेत्या का
हुतिं सोमाय द्वितीयाहुतिं हुतशेषं दत्वा पात्रमालभ्य जपति पृथिवि ते पात्रमिति
वैकल्प्यमर्थीयजुषा वा ॥ अंगुष्ठमन्नेऽवगाह्य विकीर्यन्ति ॥ अमपहता इति मंत्रेणान्नप्रा
लणपात्रमालभ्याभावः अग्नौकरणनिषेधादेव निषेधाहुतशेषस्य नानंतरं तस्य
विहितत्वाद्भुमतं जुहोमीति मंत्रलिंगात् । हुतशेषस्यैव करणस्पर्शात् ॥ तस्मात्पात्रा
लंभाभावेदानसिद्धो उक्तः । स्विष्टमन्नं स्थाने ॥ नच सकृत्कालेमसंज्ञकाविश्वेदेवाः

इदमन्नं यथोपस्कारसहितं दत्तं दास्यमानं चात्तृप्तेः स्वधापर्याप्तं अमृतरूपेण स्वाहा संपद्यतां
वो न मम ॥ अमुकस्य सगोत्रा अस्मत्पितामहाः अमुकशर्माणश्च सुरूप इदमन्नं यथोपस्कार द
त्तं दास्यमानं च आतृप्तेः स्वधापर्याप्तं अमृतरूपेण स्वाहा संपद्यतां तेन मम ॥ एवं पितामह
प्रपितामहयोः अमुकसगोत्र अमुकपत्नी इदमन्नमुपनिष्टं ॥ ततो रेखादिनां हस्तोदकं दत्वा
देवा अमृतं कुरु पितरः अमृतं जुषध्वं इति वदेत् ॥ ततः सकृद्गायत्री पठेत् ॥ रक्षोघ्नापित्र्यमं
त्रान् ॥ पुरुषसूक्तादिनि पठेत् ॥ जपंस्तु ॥ तृप्तान् ज्ञात्वा अथ यत्रान्नं प्रकीर्याग्नि दग्धाश्चयेति मंत्रे
ण पार्वणवत् ॥ श्रोत्रलाहस्ते सकृत्सकृद्दपो दत्वा पूर्ववद्गायत्रीं जपेत् ॥ मधुवाता इति च ॥ देवाः
तृप्ताः स्थ ॥ पितरः तृप्ताः स्थ ॥ तृप्ताः स्मः प्रेतस्वदितं स्वदितमिति ॥ प्र० ॥ शेषमन्नं किं क्रीय
तां से न भुंजनामिति प्र० ॥ ततः उच्छिष्टसंनिधौ पार्वणवत् ॥ पिंडदानं विधाय प्रेतपिंडं द
द्यात् ॥ तत्र यथा अपहता इति रेखाकरणं रेखायां पिंडं अमुकं प्रेत पाणिं निदध्यात् ॥ अमु
क सगोत्राः अमुकप्रेत एतत्ते अवनेजनं उपतिष्ठति ॥ सकृदाच्छिन्नानां स्तरणं अमुक
सगोत्र अमुकप्रेत एतत्ते पिंडं उपतिष्ठतां ॥ अत्र पितरो मादयध्वं इत्यंतमनु उक्तो दंडः सुमा
त नानानां स्वासधारणं ॥ अभिमर्दनं निजपः स्वासमोचनं ॥ दत्तो लोमानः पिंडोपरि पुष्पवचनं ॥

प्रसवनेजनं॥ नमोवः री उजलीकरणं॥ ऊर्जं वहंतीरिति जलनिषेकः॥ ततः प्रेतब्राह्मणाह
स्तेषु प्रोक्षितमुपतिष्ठंतु॥ सोमनस्यमुपतिष्ठंतु॥ गोत्रे प्रेतयद्दत्तमेकोद्दिष्टश्राद्धादिकमु
दकादि तदक्षय्यमुपतिष्ठतां॥ अघशिष्टं दक्षिणां दत्वा अभिरम्यामिति विसर्जयेत्॥
ततो मुकसगोत्रप्रे० पिंडः पितामहादिपिंडैः सह संयोजयेत्॥ योजयिष्ये संयोजयेत्॥
॥३०॥ अनुज्ञातः कुशेन प्रेतपिंडं त्रिधा भज्य ये समाना इति द्वाभ्यां प्रतिपिंडमेकैकं शकलं योज
येत्॥ तत्र प्रयोगः॥ अमुकसगोत्रः अमुकप्रेत अमुकसगोत्रेणामुकशर्मणा स्वपित्रा ॥३०॥
दिसंसृज्यस्व मंत्रद्वयपाठः॥ तस्मिंडं प्रथमशकलं दधिमधुलिप्तं तत्पिंडेनैकं कृत्य
पात्रे स्थापयेत्॥ अमुकसगोत्रामुकप्रेत अमुकसगोत्रेणामुकशर्मणा स्वपितामहे
न संसृजस्व॥ मंत्रयोरावृत्त्या पूर्ववत्॥ द्वितीयपिंडेनैकीकृत्य प्रथमपिंडसमीपे स्था
पयेत्॥ एवं प्रयोगेन तृतीयपिंडेन संयोजयेत्॥ ततो रेखाकरणाद्यवनेजनांते पि
धानं चतुर्थपरित्यज्या मधुनामृतसहितत्रयाणां पावेशनं॥ पिंडदानं कुर्यात्॥ पि
उकरणं प्रथमः पितृभ्यः पुत्रो वा आभ्याभिर्येते नच्चतुर्थ इति एकोद्दिष्ट्यामंत्रोक्ताः कुर्नेः

पार्वणवत् पिंडदानं पुनरिति॥ अस्मिन्नेव सूत्रे संपिंडीकरणेपि (च) तत्प्रवृत्तिस्त्रिभ्यो दानमिति कर्को
क्तेः॥ वाजेवाज इति विसृज्य॥ आमा वाजस्येति अनुव्रज्य प्रदक्षिणीकृत्य नमस्कृत्योपविशेत्॥
इति वैधनाथकृतौ प्रेतकार्य्यासपिंडीकरणं समाप्तं॥ अथ तत्र योद्दशो क्रियापाथेयश्राद्धं पा
र्वणवत्॥ पक्वान्नेनामान्नेन वा कुर्यात्॥ ततः मंगलस्नानादि कुर्यात्॥ देशकालौ संकीर्त्य
सपरिवारस्य मम सकलारिष्टोपशांतये शुभायुर्वृध्यर्थं गणेशपूजनं पुण्याहवाचनं करि
ष्ये॥ ततः आशिषा गृहि सवाबंधुभिः सह भुंजानि॥ इतरउद्वृत्य खंडधारणांते मुक्तभक्ष
णादिकं कुर्यात्॥ अतः प्रभृति संवत्सरपर्यंत आमान्यमुककुंभदानं चैकस्मै च ब्राह्म
णाय दद्यात्॥ अघ पेयपार्वणश्राद्धं कुर्यात्॥ तदुक्तं याज्ञवल्केन॥ अर्वाक् सपिंडीकरणं
यस्य संवत्सराद्भवेत्॥ तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विजः॥ गोतमः॥ अर्द्धे पा
र्वणं श्राद्धं सोदकुंभमधर्मकां॥ कुर्यात् प्रत्यब्दिकं श्राद्धं संकुर्याद्विधिनान्वितं मिति॥
अधर्मकं ब्रह्मचर्यादि नियमादि हीनं॥ शंखो मासि मासि चैनत्कर्तव्यं॥ तत्र पिंडदा
नं कुर्वीत॥ अहरहरन्नमस्मै ब्राह्मणायोदकुंभं च दद्यात्॥ पिंडमेकं च निर्वपेत् इति हेमाद्रौ

दद्यात्तेष्वी जालये ॥ प्रथमेद्विकंके कर्तव्यमि
त्थाप्रथमाब्दे दीपदानं मुक्तं देयजानीयगारुडे ॥ दद्यात्तेष्वीजालये ॥ प्रथमेद्विकंके कर्तव्यमि
सातदा श्राद्ध ॥ तीर्थश्राद्धं गयाश्राद्धं मिसादीनि वाप्यानि बहुनी तिता निसपिंडनो भ
वे ॥ अस्थिक्षेपं गयाश्राद्धं श्राद्धं चान्यत्र पैतृकं ॥ प्रथमेब्दे न कुर्वीत तत्कृते तु सपिंडने
अस्यापवादमाह ॥ अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपक्षिकं ॥ प्रथमेब्दे प्रकुर्वीत नय
दियाद्धन्निमान्सुमान् ॥ इति स्मृत्यर्थगोवभयान्नालिखितं ॥ इति वैघनाथकृतौ त्रयोदशाद्दि
॥ ३१ ॥
नकृत्यं ॥ अथ विधानानि लिख्यंते ॥ धनिष्ठापंचके जीवो मृतो यदि कथंचन ॥ पुष्करे या
॥ ३१ ॥
म्ये जीवो कुले जंमारयधुवं ॥ तन्नारिष्टविनाशार्थं विधानं समुदीरयन् ॥ दाहदेशेषवानि
त्वा स्नापयेत्सयतः शुचिः ॥ दर्भैस्तु प्रतिमा कार्या पिंजोर्शीस्त्रच वेष्टिता ॥ यवपिष्टेनानुलि
मानाभिसहवशादहेत् ॥ प्रेतनथाहः प्रेतसख्ये प्रेतनपः प्रेतभूमिपः ॥ प्रेतहर्ताप चमस्
नामान्येतानेनुक्रमात् ॥ तत्रैव प्रयोगः ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य
अमुकसगोत्रामुकप्रेतधनिष्ठापंचकमरणजनितवंशानिष्टपरिहारार्थं पंच
कविधिं करिष्ये ॥ ततः प्रतिमादिगंधादिरलंकृत्य सदाहसमयप्रेतस्योपरिन्यसे २७

प्रथमां सिरसि ॥ द्वितीयां नेत्रयोः तृतीयां वामकुक्षौ च तुर्थीं नाभौ पंचमीं पादयोः ततु परि
नाममंत्रैघृतं हुत्वा हुत्वे तत्तो दक धारां च दत्वाय माय सोमं ॥ यमकं जामहेति द्वा
भ्यां प्रतिमासु प्रत्येकमाज्याहुतिं जुहुयात् ॥ ततो विधिना प्रेतं दहेत् ॥ सूतकांते पुनः
पुत्रः कुर्याद्भातिकपौष्टिकं ॥ कुंभपात्रैस्थितैस्तैलं वीक्ष्य पदं द्याद्विजन्मने ॥ प्रत्येविकु
महेशेंद्रवरुणप्रीतये ततः ॥ मा शृणु भयं यद्धि हि प्रियं ग्वादिभ्यश्च सिं ॥ स्वर्णदानं
सोकं ज्याप्यं लक्ष्महोमं द्विजार्चनं गोभूदानं षडंशेन कुर्याद्दोषप्रशांतये ॥ इति पं
करणानि ॥ अथ त्रिपादमरणे त्रिपादर्क्षे मृतेन दाहं शरणाशकलं मुखे ॥ न्यस्यमिष्टम
यं कुर्यात्पुरुषं जितयं ततः ॥ होमं प्रतिमुखं तत्र भवेद्दहनशांतये ॥ ततो निर्हर
णं कुर्याद्दिव्यं साग्नेर्विधिस्मृतेः ॥ कुर्यात्स्त्रीणं पिष्टमयं सागरे मृते स्त्रियां ॥ त
रिक्षायस्वसंपुष्टि नो निर्हरेयुः सुतादयः ॥ इतरं त्रिस्य ग्नेदेवं जयाजयाप्रतिपादये ॥
त्रिपादभद्राभौमज्यरविये योगास्त्रिपुस्कर ॥ योगादिष्टे पुरः ॥ तत्र कर्तीकर्मण्य

पिंडार्थं कृच्छ्रत्रयं कुर्यात्॥ तत्र प्रतिमात्रयं पूर्ववत् [illegible] कृत्वा गंधाद्यैरलंकृत्य दाहसम
येप्रेतोपरिन्यसेत्॥ प्रेतवाहः प्रेतसखः प्रेतएवान्यनुक्रमात्॥ प्रथमां शिरसि द्विती
यांहृदि तृतीयां नाभौ शेषं पूर्ववत्॥ स्तनकांते भद्रानि धौमतस्य भ्रप्रत्यान्मायाहिरण्यं द
द्यात्॥ ग्स्मंगाग्गुरुवाराणां एकस्मिन्वारे मृतवस्य दानं कुर्यात्॥ इति त्रिपादमरणशा

॥३२॥ तिकविधिः॥ अथ प्रथमादिनोक्तिकानि प्रेतसंस्कारसकलं आह हेमाद्रौ गार्ग्यः॥ प्रस
क्षशावसंस्कारस्ति दिनेनैव न विशोधयेत्॥ आशौचमध्ये संस्कारदिनं शोध्यं तु संभवे
आशौचविनिर्मुक्तो चेत्पुनः संस्क्रियते मृतः॥ संशोध्यं च दिनं ग्राह्यमुर्ध्वे संवत्सरा ॥३२॥
घादि॥ शेषकार्याणि कुर्वित श्रेष्ठं तत्रोत्तरायणं॥ कृष्णपक्षस्य नत्रापि वर्जयेत्त्रिदि
नत्रयं॥ धाराहे॥ चतुर्थ्यष्टमगे चंद्रे वादशे च विवर्जयेत्॥ प्रेतकृत्स्य व्यतिपाते वैध
तौ परिघे तथा करणे विष्टीसंज्ञे च शनिश्चरदिने तथा॥ त्रयोदश्यां विशेषेण ज
न्मतारात्रयस्तथा भरण्यार्द्रा मघाश्लेषा मूलं हि चरणानि च॥ प्रेतकृत्येनिदुष्टानि

श्यापंचकं तथा॥ वसुनरार्धतः पंचनक्षत्रेषु द्विजन्मना॥ पौष्णो ब्रह्मलक्ष्मपौष्ये च दहनोल्कु
लनाशनं॥ अस्यापवादश्चैव जवापायनमः॥ प्रेतस्य साक्ष दग्धस्य शास्त्रे से काद्दशोहनि॥
नक्षत्रतिथिवारादि शोधनीयं न किंचन॥ विंध्ये प्रकाशे॥ गुरुभार्गवयोर्मौढ्ये पौषमा
से मलिम्लुचे॥ नातितः पितृमध्यस्याज्ञ यां गोदावरिं विना॥ प्रेतक्रियानकर्तव्या रवि
वारे कथंचन॥ पुष्येन तथानुराधायां रेवत्यां यमपेन्द्रके॥ कालाच्यउवाच॥ पंचकेम
तलोकानां शुभाशुभफलोच्यते॥ वासवोत्तरदत्वा रम्य पावृत्त नक्षत्रपंचकं॥ धनिष्ठा
बुधयोगेन वरुणं भगुनंदने॥ पूर्वानं देहिर्बुध्नोरवौ भौमेचरेयन्ति॥ सचारसंयोगेकृ
त्यपोगेषु भविष्यंति महद्भयं॥ पुरुषोवास्त्रियोवापि वल्लवाभ्यो महिषि॥ महिषि
वृषभौ वापि॥ सिद्धासस्तथैव च॥ विपत्तिपंचके यांति अरिष्टं तु महद्भयं॥ संक्रा
तौ ग्रहणे दर्शे रिक्तागंडांतपातयोः॥ वैधृति वज्र विष्कुंभ शूलव्याघात परिघा
गजभद्रा सुरा कुनिनिति चैव चतुष्पदं एता संयोगे योगिनां यदामृत्युर्भविष्यति॥

प्रतस्योर्ध्वगतिश्रेष्टा संततौ नशुभं भवेत् ॥ तस्य दाहप्रकर्तव्यो विनाशं सर्वजातिषु ॥ पंच
कानंतरं तस्य कर्तव्यं सर्वमन्यथा ॥ पुत्राणां तु स्वसंतानो योगानि स्त्रस्य जातिषु ॥ अथवा
तद्दिने कार्यो शतहस्तु विधिपूर्वकः ॥ सूतकानंतरं दापूत्रैः शान्तिः कुर्यात्प्रयत्नतः ॥ वासवो
त्तरदले मृतौ अग्निजाना सहस्रकं ॥ गायत्री मधुतं जप्त्वा प्राणायामशतत्रयं ॥ दशांशवि
धिना हुत्वा तिलाज्येन द्विजोत्तमः ॥ पंचरत्नानि तैलकैः पंचधा च फलं तथा ॥ तंदुलेपरि
पूर्णं च घंटा वस्त्रसमन्वितं ॥ सुवर्णं धेनुसंयुक्तं ब्राह्मणाय निवेदयेत् ॥ लघुरुद्रं
तं जाप्यं ब्राह्मणान्भोजयेच्छतं ॥ वासवे मृत्यु दत्सानां शांतिर्भवति निश्चितं ॥ इति धनि
ष्ठाविधिः ॥ शततारका विधानं तु जपं प्रणवपूर्वकं ॥ वरुणस्तंभं नमसि रात्रि
जप्त्वा सहस्रकं ॥ कलशं जलपूर्णं तु सप्तधान्यसमन्वितं ॥ स्वर्णं वस्त्रसंयुक्तं
ब्राह्मणाये निवेदयेत् ॥ होमं जपं दशांशेन तिलाज्येन तु कारयेत् ॥ ब्राह्मणान्भोजये
तानु शतार्धं चैव संख्यया ॥ सुवर्णं मन्वेतं वस्त्रं च यच्च मे तां गां दक्षिणां ददेत् ॥ चतुर्थं

॥३३॥

फलदानं च श्रोत्रियाय निवेदयेत् ॥ इति शततारका विधानं ॥ अजैकपाद विधानं च प्राण
यामशतत्रयं ॥ महिषि सुवर्णं वस्त्रं च ब्राह्मणाय निवेदयेत् ॥ महाशांतिः प्रकर्तव्या ग्र
हशांतिर्विधानतः ॥ अरिष्टशमनं तस्य शांतिर्भवति निश्चितं ॥ इति पूर्वाभाद्रप
दा विधानं ॥ उत्तराभद्रपदा मृतौ प्राणायामशतत्रयं ॥ गायत्रि मधुतं जप्त्वा दशां
शं होममाचरेत् ॥ गोधूमैः पूर्णकलशं वस्त्रं च ससुवर्णकं ॥ पंचरत्नसमायुक्तं फलं चैव
समन्वितं ॥ शांतिकं ग्रहयज्ञं च रत्नां गां दक्षिणां ददेत् ॥ अरिष्टशमनं चैव शांतिर्भ
वति शाश्वति ॥ इति उत्तराभाद्रपदा शांतिः ॥ पौष्णे तु मृत्यु संप्राप्ते प्राणायामशतत्र
यं ॥ गायत्री मधुतं जप्त्वा दशांशं होममाचरेत् ॥ धान्यं तैलं गुडं चैव कार्पासं ल
वणं तथा ॥ रसौ रेतेः पूर्णकलशं पंचरत्नसमन्वितं ॥ पंचफलानि वस्त्रं च सुव
र्णं दक्षिणां ददेत् ॥ ब्राह्मणान्भोजयेच्छत्या धेनां गां दक्षिणां तथा ॥ इति पंचकवि
धानं ॥ अथ प्रोषितस्य साग्नेर्दाहो लिख्यते ॥ तत्र देवजानियेअत्रिः ॥ प्रोषितस्य

मृतस्यापि विशेषः प्रतिपाद्यते॥ पराकृद्वयमप्येवा कृछ्रं धृत्वा सुतादिभिः॥ मृताग्नि
होत्रहोतव्यं प्राह हानत्रं कथ्यते॥ प्राचीनाविती नासव्यां राम्यमेवाहुरे करे॥ सादना
प्रागग्रे दक्षिणाग्रेष्वत्र तेऽसस्वपरि ॥ प
भावतः कूर्चस्थापनं न भवेदिह॥ न याद्दक्षिणतो भस्म निरस्योर्ध्वं च
पुष्कलं चैतस्यैव कार्यमाग्नेयदक्षिणं॥ धास्यत्समिधं चोर्ध्वाग्र
समिधं॥ इध्माभस्मन्याधिश्रीसावज्योत्पवनं येन तेनः॥ अपसव्यं
दक्षिणे नोन भवेत॥ तु कृत्स्नसमिध मादायसव्यं जानुनिपात्य च॥
च कृत्वा सकृत्सर्वं विनिक्षिपेत्॥ इतिहासस्तु वेद्यो यदाधासरिपतितो वदेव
मग्निहोत्रहोमः कर्तव्यः॥ प्रोषिते यजमाने प्रेते कथं दाहः कर्तव्यमिसपक्षा
पामापसंभमाह॥ अनग्निससशाग्निविधिनाग्निवीप्रमिपतनात्मन्येन
नदहतीति॥ यजमानाय पतनप्रपतनि धाय गार्हपत्यायतने अरणि संस्था
प्यपरस्याग्नयो जुहुतो मासकामः संकल्प्यापत्नी ते यजमानमासं जापेत्॥

॥३४॥

नेहविषसादनायते स्वर्गं लोकं इमं प्रेतं नयन्तिति मथित्वानुकिं विहस्य हादश्रागहिनेन
स्त्वं पूरइत्वानुष्ठितुलामास्यादिकमप्रतिपाद्यते॥ अथाग्नौ समारूढयजमाने मृते
अरण्योः प्रेते स्पर्शं कृत्वा पायरोहणमंत्रं पठित्वाग्निमथित्वा तृप्ति मावाहनीय
मुध्यस्याज्यं सस्रुक्सहादश्रागहीनं कृत्स्नं मावाहनीयहुत्वा रत्वादि अयणादि कुर्यात्
मंत्रस्तु॥ उपावरोह जातवेदः इमं प्रेतं स्वर्गायलोकाय नयप्रेताहन्तिं चास्य॥ जुरवस्त
स्वाहेति अग्निषु सां तेषु यथाविभज्यारण्याय यजमानप्रेते अयुग्मे अरणि आदाय तया
स्पारिदक्षिणपाणिं निधाय पुत्रादिरयं तेरतिजपित्वा पश्चान्मथनाधानवत्
सर्वं कृत्वा तेपूर्ववद्दहेत्॥ एवमेव स्मार्ताग्नेरपि द्रष्टव्यं॥ अथउत्सन्नाग्नेउत्सृष्ट
न्ते च विशेषः॥ मरणसमये अग्निसिद्ध्यर्थं पराकद्वयमष्टौ कृछ्राद्वयनू वा कृत्वा
अग्निविच्छेदगणनया यथासंख्या प्रायश्चित्तं विधाय पाशकौ च सुतादिभिः प
श्चात्संस्कारः कार्यः॥ अग्निविच्छेदप्रायश्चित्तमाह॥ पासयमकासायनः॥

॥३५॥

यावन्यद्वा स्वनीतानि निरग्नेर्विप्रजन्मनः ॥ तावत्तिकुशः प्राणिषरेशास्यं दद्यात्स यज्ञतः ॥ एवं प्रा
यश्चित्तं विधायाग्निमथनं दद्यात् ॥ यजमाने प्रेते तु आदिप्रायश्चित्तमेवं ॥ कुशामयनो धान
वत्सर्वं कार्यं ॥ देशान्तरमृते तु कुविधानादाहरेत्वा शरीरमानितसामिपानिरेत्वा कुशा
जिने पुपुरुषाकारं न्यसेत् ॥ तदुक्तं विधानपारिजाते ॥ ततः कुशाजिने स्थिते निपुरुषाका
रं न्यसेत् ॥ ऊर्णाभिर्घाद्येनानिधने नोज्योभ्यो पूर्ववत् ॥ पालाशानि योजिज्ञ रत्वा तं
दहेद्दत्ताप जाग्निभिः ॥ अनाहिताग्निमप्येवं निरग्निं च दहेदपि ॥ मथमन्ते दहनं
कुर्वाया या धाशास्य हि संचयः ॥ अस्थिनि च तु लभ्यते प्राषितस्याग्निहोत्रिणः ॥ तदुक्तं
आश्वलायनकारिकायां ॥ अस्थिनाशे पलाशवृन्तेन पुरुषप्रतिकृत्यं चयेत् ॥ असित्यर्धं
सिरस्थाने ग्रीवायां दश योजयेत् ॥ उरसि त्रिंशतिं दद्यात् विंशतिं जठरे न्यसेत् ॥
बाहुद्वये शतं दद्यात् अंगुलिषु तथा शेषं ॥ दशं तु वृषणयोः रष्टौ सिक्के एवं तु
उरसि शेषं दद्यात् द्वे शते जठरे न्यसेत् ॥ त्रिंशतिं जानुजंघयोः ॥ पादांगुलिषु

॥३५॥

दशाचैवं षष्टिश्चात्रत्रयं ॥ ऊर्णासूत्रेण संवेष्ट्य यवपिष्टेन लेपयेत् ॥ द्रव्याणि र
भ्रम्लेप स्तु उक्तानि गमे ॥ मस्तके करलिं दद्यात् नारिकेलं शिरस्तु ॥ ललाटे
कदलीं चैव दन्तेषु दाडिमं न्यसेत् ॥ कर्णयोः कंकोलं दद्यात् नेत्रयोश्च कपर्दि
कं ॥ तिलपुष्पं नासिकायां नाभौ चाम्रफलं न्यसेत् ॥ स्तने मनःशिलां दद्यात् ते
त्रेषु हरितालिकां ॥ कसमुद्रफेनं तु रुधिरे मधु विन्यसेत् ॥ पुरीषे गोम
यं दद्यात् केशेषु कृत्तिकेसरान् ॥ रोमस्थाने प्रदाने व्यामा से षु नवपिष्टकं ॥
पंचामृतैः पंचगव्यैः प्राणं जीवं तु भावयेत् ॥ स्पृष्ट्वा चंदनसुगंधैः र
पवित्रेन चार्चयेत् ॥ ततः संस्कारं कुर्यात् शास्त्रविधिना यथा ॥ रतिपाली
शविधिः ॥ अथ साग्निर्दुर्दिष्टमरणं ततः संस्कारमापाशरः ॥ चांडाले
न स्वपाकेन गोभिर्विप्रहतोपि वा ॥ आहिताग्निर्मृतो विप्रो विशेषेनात्मघातिकः
दहनं श्राद्धं विप्रा लोकिकाग्निर्मंत्रवर्जितो दह श्वनिपुनर्गव्याक्षीरेण क्षालये

ततः॥ स्विनाग्निना स्वमंत्रेण पृथगेतस्तु नर्दहेत्॥ तदपि संवत्सरांते षण्मासांते वा
चान्द्रायणत्रयं चायेरेणावलिं च कृत्वा कार्यो॥ तदहा गिरः॥ चांडालादुदकात्सर्पा
द्ब्राह्मणाद्वैद्युतानलात्॥ दंष्ट्रिभिश्च पशुभिश्च मरणं पापकर्मणां॥ उदकपिंड
दानं च प्रेतश्राद्धायस्मात्तीयते॥ नोपतिष्ठति॥ तत्सर्वमंतरिक्षे विनश्यति॥ न संस्का
रविधिस्तेषां नैव कार्योदकक्रिया॥ रुदनेनैव कर्तव्यं सूतकेन च शुद्धिभिः॥

॥२६॥

दग्धाशरीरं लोकाग्निसंस्थाप्यास्थीनि यत्नतः॥ प्रायश्चित्तं प्रकर्तव्यं पुत्रैश्चोद्ध

॥२२॥

रणमिति॥ अथवा द्विगुणप्रायश्चित्तं कृत्वा सद्य एवं समसंस्कुर्यादिति॥ ना
रायणभठिये॥ मनुः॥ नाशौचं नोदकं पिंडं श्रुत्वा दाहं वनकर्म च॥ ब्रते दंड
हतानां च न कुर्यात्कटधारणं॥ येतान् प्रक्षिपेदप्सु आवसथ्यं च तुष्यथो
पात्राणि तु दहेदग्नौ यजमाने यथा मृते॥ इति नंदकृतप्रायश्चित्तं॥ शुद्धिप्रच
कृत्वा मेघानादिस्तु नाशौचविषयं वेनिज्ञेयं॥ अथ प्रमादादिमृतानां संस्कार

माहागिरः॥ अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः॥ यस्याशौचं विधातव्यं क
र्तव्या चोदकक्रिया॥ प्रमादमृतानेति॥ कार्याद्धोचे पात्ररूपेते॥ रुक्तानिपंचद
शाज्ञाननंतः संस्कारमाचरेत्॥ पदिशास्य विहितमार्गेण बुद्धिपूर्वात्मघातं प्रयोग
गादौ कृत्वा नावनादोषएव॥ नास्ति॥ त्रिरात्रमेवाशौचं तत्रैव मदशाहं कुर्यात्॥ पंच
मदिने सपिंडानां॥ अथ कुमरणे दानानि कार्याणि॥ तिन्नक्षत्रानापीत्रिये॥ व्या
घ्रेण निहते विप्रविप्रे कन्यां विवाहयेत्॥ सर्पदंष्टे नागबलिर्ज्ञेयः सर्पश्च कांच
नं॥ चतुर्निष्कमयं हेमं गजं दर्पाजे हते॥ राज्ञा विनिहते दद्यात्पुरुषं तु हिरण्मयं
चौरेण निहते नघ वैरिवैरिणा निहते वृषं॥ वृषेण निहते दद्याद्धान्यपृथाराम्या
वकांचनं॥ शय्यामृते प्रदातव्या शय्याकृति समन्वितेः॥ निष्कमात्रं सुवर्णस्य चिकुना
मधिसंस्थिते॥ गोत्रविहिने मृते चैव धान्यनिष्कं सुवर्णजं हरि॥ संस्कारहीने च मृते
कुमारमुपनाययत्॥ मिश्रकत्रयं सुवर्णमिति दद्यादश्वेहतेनपा॥ शुना हतेस्तंत्रप

॥३७॥

ल्तासर्पपशुभिर्जशाकिनः ॥ मकूटेण हते दद्यान्महिषिं दक्षिणान्वितां ॥ कृमिभिश्च
मृते दद्यात्प्रोधमाभं चुवर्णारि कान् ॥ दंसे दंष्ट्रहते दद्यात्स्वर्णं रौप्यस्य संयुतं ॥ भंगे
नानि हते दद्यात् सप्तभेदं स्वर्णसंयुतं ॥ भृगुपाते मृते चैव गदं दद्याद्धान्यसंयुतं ॥ अग्निना
निहते चैव उदपानं स्वशक्तितः ॥ दारुणा निहते चैव कर्तव्या सदने सभा ॥ शस्त्र
णा निहते चैव महिषिं दक्षिणान्वितां ॥ अश्मना निहते दद्यात्सवत्सां गां पय
स्विनीं ॥ विषेण मृते दद्यात् मेदिनीं स्वर्णनिर्मितां ॥ उद्बंधने मृते दद्यात्कपिं का
ञ्चननिर्मितां ॥ मृते जलेन वरुणं हेमं दद्याद्द्विनिष्कजं ॥ विषूचिकामृते स्वाद्
भोजयेच्च शतं द्विजान् ॥ घटेन धेनुप्रदानं स्यात् कंठं ते कवले मृते ॥ कासरोगेन च मृते
अष्टकृच्छ्रव्रतं चरेत् ॥ अतिसारमृते तिलसंगायत्र्याप्रयतो जपेत् ॥ शार्दूलव्याघ्रादिसहस्र
स्रं जपेत्कुर्यात् यथोचितं ॥ विद्युत्पातेन निहते विद्यादानं समाचरेत् ॥ अंतरिक्षं मृते का
यं वेदपारायणं भवेत् ॥ सर्पाख्यपुस्तकं दद्यात् स्वस्त्यो मृते ॥ पतिते च मृते कु

प्राजापत्यो लक्षु षोडश ॥ मृते वापरस्य रहितं कृष्णानानवती चरेत् ॥ एवं कृते विधानेन तत्त्वया
लिं दद्यात् सोर्ध्वदेहिकं मिति ॥ इति दुर्मृति विधिः ॥ अथ कुष्ठिमरणयमः ॥ मृतस्य कुष्ठि
नो देहं निखने क्रोष्टुभूमिषु ॥ वासरत्नीयं तन्तु धत्सान्यत्र नोद हेत् ॥ गंगा
ल वने कार्यं निक्षिप्य विधिना कृतं ॥ मासि मासि नतः कुर्यान्मासि श्राद्धानि पार्वणानि ॥
संकल्प्य विधिना कश्चित्प्रवदंति मनीषिणः ॥ इत्येतत्कुष्ठिनो दुर्ध्वं कथितं शास्त्रकोविदैः ॥
स्मृतिविद्भिरनुचानैर्यमाद्यैः पुनि विग्रहैः ॥ इति कुष्ठिमरण ॥ पूर्वोक्तानामेव लेख्या
दहेत् ॥ अथ सहगमन विधिः ॥ अथान्वारोहणं स्त्रीणां मात्मनो भ्रान्तरेव च ॥ सर्व
पापक्षयं करं निरयोत्तारणाय च ॥ अनेकस्वर्गफलदं मुक्तिदं चेन धेव च ॥ जन्मान्तरे च
सौभाग्य धन पुत्रादि वृद्धिदं ॥ भर्तृमरणसमये आत्मनः प्राणान् संकल्प्यात्तथा ॥
दैवैः संपादितो मत्स्यपति स्त्रस्त सर्वदैवतं ॥ तयास गमिष्यामि भर्त्रा तवं चाप्य ग्रमनि ॥
रो ल्यानि लधेन्वादिदानं ॥ अलंकृत्य चेरु वारोहणमग्रे पुष्पाहीति ॥ अथवा ॥

॥१२८॥

स्मशानं नीयमानं च भर्त्तारमुपयाति या सा पदे पदे यज्ञफलं लभते नात्र संशयः ॥ अत्रा
यहेत्यादि ॥ आत्मनो भर्तृश्चादि जन्मजन्मांतरपराजितं सर्वपापहारं लक्ष्मीनारायणस्य
प्रीत्यर्थं अन्वारोहणं करिष्ये । तत्र वंशपात्रदानमंत्रः ॥ लक्ष्मीनारायणो देवो बल
सत्वगुणाश्रयः ॥ वंशसत्वं च मे देयात् दायुनेः परितोषतः ॥ सोपस्कारा गिरे पाणि वाय
नैः सयुतानि च ॥ लक्ष्मीनारायणप्रीत्यै सत्यं कमंसदादाम्यहं ॥ अनेन यथोपस्कार
रूपदानेन लक्ष्मीनारायणः प्रीयतां ॥ अग्नेः समिपं गत्वा पंचरत्नानि पल्लवे निलीज
नेन तथा बध्वा पुष्पफलं न्यसेत् ॥ ततो ग्निप्रार्थनं कृत्वा मंत्रेणानेन निश्चितं ॥
स्वाहा संश्लेषनिर्विष्टा सर्वगोत्रहुताशन ॥ सत्यमार्गप्रदानेन नय मा यत्तु रांते कं
र स्वग्निप्रार्थना ॥ आज्येन जुहुयात् ॥ अग्नये तेजोधिपतये स्वाहा । इदमग्नये० अथादि
वत्से सागः ॥ विष्णवे सत्वाधिपतये स्वा ॥ कालाय धर्माधिपतये० पृथिव्यै लोकाधिष्ठा
त्र्यै० अद्भ्यो रसाधिष्ठात्र्यै० । त्रिभ्यः० वायवे बलाधिष्ठात्रे० त्रिभ्यः० आकाशाय सर्वाधिष्ठा
त्रिभ्यः० ॥ एकादशाहुतिं हुत्वा कुर्याद् ग्नेः प्रदक्षिणाः ततः शिलां प्रपद्यन्ये । नामास्त्व

फलं पुष्पादिरिवा अग्निं प्रार्थयेत् ॥ त्वमग्ने सर्वभूतानामंतश्चरति साक्षिवत् । त्वमे
व देव जानीषे विदुर्यानि न मानुषः ॥ अनुगच्छामि भर्तारं वैधव्यभयपीडिता ॥ सत्य
मार्गप्रधानेन नियमां भर्त्तारं तिकं ॥ मंत्रमुच्चार्य शीशने कें प्रविषन्न हुताशने ॥ नो
पतस्याभर्त्तारिमांतेरः सुमादेव राशिर्ध्यावा न मः स्कृत्यं करे ष्टत्वा उद्दिपेति छाध्यांमं
त्रोः स्यांसल रशाहि तोऊ छापयेत ॥ सत्याधिकास्तु स्तुहृदः समाश्च स्य भर्त्तारं वि
रूपं स्मरंति ॥ प्रविशेत्तु नरं दंगर्भिणी बालवत्सा स्तुतिकानां निषिद्धं ॥ स्वैरिणी
नां पतितानां न योषितानां ॥ नास्ति कायदग्निसंचेस्यः पतितो पि तथा उभावपि ॥
मदनसंग्रहान्ते व हन्नादीयेपि ॥ बालापत्यश्च गर्भिण्यासंहदृष्टजन
वस्तुथा ॥ रजस्वला राजसुता नारोहति चितां रति ॥ अलण्याणकाचितिः
क्षत्रियादिनां पृथग्भावा ॥ पश्चात् रजस्वलानां रिमनेपस्मोदेशकालवं
परात् ॥ दंतेयानगछति न शुद्धि प्रतिपत्तने ॥ तत्र विधिः ॥ यदा स्वियामुदक्यानां

पतिप्राणा स्नमुस्त्र जेत्॥ तेनमेकं तं दुलानां मदवहन्यादित्युद्दये॥ मुलधाने स्नहस्त भ्रूप्रसवेषो निमंडगोत्॥ विरजस्काज स्कामेन्य पानां स्वाचिंतेन दस्रक्षयं॥ दुष्टा शौचं प्रकुर्वीत पंचरात्रिकयापृथक्॥ त्रिरात्रिं शन्तिदत्रावागवां दत्त्वा त्यहः कमा त्॥ विप्राणां चैव नास्थिशुद्धिः समारोह हेतोरने॥ नारिणां रजस्कानां मेयं शु द्धि रुदाहृता॥ अत्रमुक्तं चिंत्यामिति निर्णयसिंधौ मन्वारोहेतु नारिणां पस्तु शुद्धे
॥३१॥ कोदकक्रियापिंडदानं क्रियातद्रहत्रभाद्रं प्रस्यादि कां.. तथा मन्वारोहे ॥३१॥
कृतेनपत्यापृथक्पिंडतिलोजलीं॥ पृथक्कुर्याद्वेन कुर्वीत दद्या द्देकशिलेन ॥ एवं चित्यारोहणे॥ स्त्रीयाः पृथक्सपिंडनं नास्ति भर्तृकृते स्त्रियाकृतं भवतीति स्मृत्यर्थसारे॥ भर्तैव केन ति वहवाः भर्तौ दिये पे सत्वे॥ इति सहगमन॥ अथ प्रसंगात्रजस्वला मरणविधिरुच्यते॥ गर्भस्थकारिकायां॥ अंतरिक्षमनायच वस्त्रो वस्तु प्रमादस्ता॥ उदक्यासूतिका नारी चरेत्

प्रायश्चित्तं यं गशास्त्र निसंग्रहे पि॥ पंचमिस्नापरत्वान्तु दध्ये प्रेतां रजस्वलां॥ वस्त्रांतरं स्नातां कृत्वा दाहये द्विधिपूर्वकं मिति॥ तत्रप्रयोगः॥ देशकालौ संकीर्त्य॥ अमुकगोत्राया अमुकस्या रजस्वलावस्थां मरणजनित दोषपरिहारार्थं औध्वदेहिक योग्यता सिध्यर्थं चांद्रायणत्रय पूर्वकं गर्भे पंचगव्येन स्नानं तस्या॥ नानि कारिष्ये॥ ब्राह्मणवचनाच्चांद्रायणत्रयं कृत्वा पंचगव्येन प्रनमनुलिप्य सर्वं स्नात्वा मंत्रे पोदकेनाष्टोत्तरशतवारं स्नापयेत्॥ अन्यवस्त्रेणाच्छाद्य दहेदिति प्रयोगः॥ अथ प्रसंगात्सूतिकामरणविधिरुच्यते मितनाक्षरायां॥ सूतिकायां मृतायां तु कथं कुर्वंति याज्ञिकाः॥ कुंभे सलिलमादाय पंचगव्यं क्षिपेत्ततः॥ पुण्याभिमंत्र्य तु संस्नापयेत्सूतिकां ततः॥ च्यविधिना दहेत्॥ गर्भस्थकारिकायां सूतिकामरणं चात्र सर्वौषध्यनुलेपनं॥ नस्नापयेत्किंतु संस्पृश्य भर्तृपाणौतु शांतं क्षिपेत्॥ दशाहादिनाद्रुत्तरं तु॥ सूतिकातु यदा नारी प्राणांस्त्यजेत् परिस्पर्शमात्रं समं कायाधिं याव दशोभिः कृपे विशुध्यति॥ तत्र प्रयोगः॥ या

अयेहेत्यादि॥ अमुकगोत्रागोत्राया अमुकस्याः सुकृमस्तनि भावस्था मरणजनितदोषप
रिहारार्थं ओर्ध्वदेहयोग्यतासिध्यर्थं सर्वौषधिपलेनपूर्वकं चांद्रायणत्रयं पुण्यगर्भीह
षेककरिष्ये फलशस्थापनपूर्वकं मध्ये गोरस्यैर्वा रुणमंत्रेस्नापइत्वा॥ विधिनादा
हं कुर्यात्॥ स्तनिस्तनिकामरणं॥ अथ गर्भिणिमरणविधिः॥ षडशीतिमते॥ गर्भि

॥४०॥ ण्या चैव मृतायां दक्षिणा शिरसंतथा॥ एतस्यानाभिरधस्तात् छेद्य मुद्धारं च ॥४०॥

तुरंगुलं हिरण्यगर्भमवतंनेति विप्र गर्भस्थ प्राणस्तप्रक्षाल्यं निरखनेत्॥ स
पदि जीवति जिवमग पुत्रके क्षीरं चीयेतिले पंचाभिस्नापरत्वा विश्र्युत्यां मंत्राप
पे अथ छिद्रस्य लिरानायुधायेति पंचा कुर्तिर्दुताभिर्नमुद्धरं स्वत्रेणसंध्यं घृते
नानुलिप्य॥ आप्लायतिलगर्वाभिस्वर्णदद्याच्च थोच्चेनकल्पेनदहेत्॥ बोध
युनेनतुरानायुधायेति पंच होमानंतरं आयास्याय प्रायासायेति त्यादि आचार्य दधि
विप्याऽन्याहातेरप्यधिकारदक्तः॥ गृह्यकारिकायां॥ यदा गर्भ यवतीनारि

सशल्यस्सस्थिता भवेत्॥ कुक्षिं भित्वाततः शल्यं निर्हरेयदि जिवति॥ प्रमितेनिरखनेत्तेतं
प्रायश्चितमतः परं॥ सातत्रस्त्रिंशता कृच्छ्रैः शुद्धेनेशल्यदोषतः॥ सगर्भदहनेत्सा
भ्रूणवैधपातकं॥ प्रायश्चित्तं चरित्वानुशुध्यंति न्यायकारिणः॥ दग्धानुगर्भे
पुत्त्रे चिरदक्कृच्छ्रमाचरेत्॥ इति गर्भिणीमरणविधिः॥ अथ दुर्मरणमृतानां
प्रायश्चित्तानि॥ दुष्टोच्छिष्टोधरच्छिष्टोभयोच्छिष्टेषु सत्स्वपि॥ अस्पृश्यस्पर्श
मरणे रजस्वलायां निगडादिषु॥ षड्द्वादशाब्दपंचशतं कृच्छ्रान्विधायच॥ गृहे
त्याविप्रवचनात् शिष्यस्यानुसारतः॥ शौचान्तदेवे॥ कृच्छ्राणं प्रत्याम्नायं प्र
दापयेत्॥ धेनुगोभूहेमधान्यधनवस्त्रादिकं चयेन्॥ दानिं शुद्धि मासा
ध्यदहेतादिनतश्चरेत्॥ सर्वासमनाशुद्धि मिष्टा स्पिंडादिः पापवर्जेणः॥ तदहेदिनाद
सौतं प्राग्यसर्वभेषजो॥ एवमेवात्मनः शुद्धिमनपापोदकादिकं॥ लोभादिना स
नसर्वमंनरिक्षे विनश्यति॥ गृह्यकारिकायां॥ प्रमादादपिनिरांकृत्वक स्मादिधि

चोदिताः ॥ शृंगिदंष्ट्रिनखिव्यालविषवह्निजलाग्निभिः ॥ चांडालैर्व्रात्यैर्चौरैः निह-
तो यदि कुत्रचित् ॥ चांद्रायणं तप्तकृच्छ्रं दद्यात्तस्य विशुद्धये ॥ महाकृच्छ्राण्यं च दशकृत्वो
कश्चिद्विनादहेत् ॥ बुद्धिपूर्वं मृतानां तु त्रिंशत्कृच्छ्रं समाचरेत् ॥ देवज्ञानियमालिबुद्धो
धिष्टेधरोधिष्टेउभयोर्विहितकं तथा ॥ अस्पृश्यस्पर्शने चैव जलभस्मक्षेपमृतौ तथा ॥ संज्ञाया
॥१०॥ मरणे चैव तथा निगडबंधने ॥ सप्तस्वेतेषु कृच्छ्रेषु त्रिंशद्दश क्रमात् ॥ पंचदश कृते ॥१२॥
ले द्रव्ययूथासंख्यं प्रकल्पयेत् ॥ पाषाणैर्लकुटैर्दंडैर्हस्त्यादिस्फोटकादिभिः ॥ विषैः प्रप-
तनाद्येश्च नवकृच्छ्रविशोधनं ॥ भिस्रायापरोपघाते च पथ्यादिषु तथैव च ॥ विषुप्रातमृता-
नां तु शकटेन मृतौ तथा ॥ उष्ट्रेण ... पिमृतानां च विशेषतः ॥ मेषेण निह-
तायेच प्रव्रज्यानां शक्त्या तु ना ॥ चौरादिभिर्हतानां च त्रिंशत्कृच्छ्रं विशोधनं ॥ विषू-
चिका तथा ध्मानां विषसंज्ञमृतौ तथा ॥ शबरश्च पिशितं चैतत्रीकृच्छ्रा कृत्वा दहे-
त्सुतं ॥ रजस्वलासूतिकयोः प्राक् स्पर्शने मृतेः ॥ अदहेनैव तु कृच्छ्रेण शुद्धिर्या-
स्यायनो ब्रवीत् ॥ रजे कश्च मेकश्च चनटौ तु रउ एव च ॥ केवलं मेदभिन्नस्य

श्रीगणेशाय

सप्तनेष्वतजासूतौ ॥ एतत्सर्वोपरर्यदि वा कथंचन ॥ एकत्रिंशन्नाकृच्छ्रं स्तुशुद्धिर-
को मनोपिभिः ॥ कुलपे चोर्ध्वदग्धे च चितास्पृष्टौ स्वजादिभिः ॥ त्रिंशत्कृच्छ्रं विशुद्धिस्या-
त्प्रियात्राकौत्रिकृच्छ्रं ॥ अतिक्रांते कोदशाहा मृतानां येपापरोगिणः ॥ कृच्छ्रं तयं समा-
दध्येतेषां वृद्धेय ब्रह्मा चरेत् ॥ निमित्तान्तरतस्ये न प्रायश्चित्तं प्रकल्पयेदिति ॥ आत्मघा-
तस्य निरत्नावत्स्याव्यासः ॥ आत्मनोघातमुद्यध्य चरेच्चांद्रायणं व्रतं ॥ तप्तकृच्छ्रं चतुष्कं वा तपः॥
त्रिंशत्कृच्छ्रमथापि वा पुनः ॥ अर्वाक्संवत्सरात्कुर्याद्दहनादि यथोदितं ॥ कृत्वा नारा-
यणबलिमनिस्य लोत्तदा पुषमिति ॥ इदं चात्मघातविषमे निर्त्त प्रायश्चि-
त्तमत्र जातिविधाननिमित्तप्रायश्चित्तेन समुच्चितपुत्रादिभिः कार्यमिति
उक्तं बोधायनेन नारायणबलिं व्याख्यास्यामो भिशस्तपतितकुरोपा-
नादि हा स्वामिनां ब्रह्महाहतानां च ॥ मदनरत्नस्मृत्यर्थसारे ॥ ब्रह्महादीनां
तयोग्यं प्रायश्चित्तं कृत्वा नारायणबलिपूर्वकं संस्कारं कुर्यादित्युक्तं ॥

॥४२॥

त्र्योदशपाखांड्यादिनां रजस्वलासूतिगर्भिणीनां दुर्मरणमृतानां च नारायणबलिं
कुर्यात् ॥ तद्यथा ॥ कस्यांचित् शुक्लैकादश्यां नद्यां अन्यत्र वा तीर्थं गत्वा शुचौ देशे गोमये
नोपलिप्य संप्रोक्ष्य पूजासामग्रीं संपाद्य कृतनित्यकर्मा प्राणानायम्य देशकालौ संस्मृत्या
मुकनाम्नः प्रेतस्य आत्महत्यादिनोपाखांडित्वादिनी जनितपापोपशमनद्वा
रा ऊर्ध्वदैहिकक्रियायां संप्रदानत्वयोग्यतासिद्ध्यर्थं नारायणबलिं कर्म करिष्ये
इति संकल्प्य ॥ कलशपंचकं व्रीहियवानां राश्युपरि उदकुंभं स्थापयेत् सोदकेनापूर्य
पोहिष्ठेति मंत्रत्रयेणाभिमंत्र्य सर्वौषधिमिश्रं गंधादि प्रतिकलशं प्रक्षि
प्य पंचस्वेव वेष्टयित्वा पुष्पाणि पंचरत्नानि प्रक्षिप्य ॥ तदुपरि ताम्रादिनिर्मित
पूर्णपात्रेषु ब्रह्मविष्णुशिवयमप्रेतनाम्नां पंचमूर्तीः अग्न्युत्तारणप्रतिष्ठापूर्वकं स्था
पयेत् ॥ प्रतिप्रकृतिः पूर्ववत् कं सुवर्णं रजतं वा कर्षादि परिमितं यथार्हं ॥ तत आवाह
नादि षोडशोपचारान् कुर्यात् ॥ पंचानामपि ॥ नेत्रयोः पुरुषसूक्तेन ॥ ब्रह्मणः

हिरण्यगर्भ इति ॥ रुद्रस्य षडुद्राय इति यमस्य यमाय त्वेति प्रेतस्य अमुकप्रेताय नमः ॥
एवं पंचदेवताः पदार्थानुसमयेन कांडानुसमयेन वा यथाविधि संपूज्य ॥ विष्णवे म
हात्मने संमर्प्य पूजां संपूर्णतां याचयेत् ॥ विष्णुस्तुतिः ॥ जितं ते पुंडरीकाक्ष नमस्ते
विश्वभावन नमस्तेस्तु हृषीकेश महापुरुष पूर्वज ॥ अनादिनिधनो देवः शंखचक्र
गदाधरः ॥ अव्यक्तः पुंडरीकाक्षः प्रेतमोक्षप्रदो भवतु ॥ विष्णुधर्मोत्तरे पंचमु
दालस्य प्रति विष्णुः ॥ पूर्वमेनं तर्पयेद्भक्त्या मंत्रैः पौराणवैदिकैः ॥ तर्पणं पुरुषसू
क्तमंत्रैर्विष्णोर्वा ॥ कारयेत् ॥ पौराणो जितंते स्तोत्रादि विष्णुमंत्राः ॥ विष्णुसूक्तं ॥
ततः स्वगृह्योक्तमार्गेण अग्निप्रतिष्ठाप्यान्वाधानं कुर्यात् ॥ तत्र विशेषः ॥ अस्मि
न्नाहिते अग्नाविध्यादिचक्षुषी आज्येनेत्यंते मुख्यं नारायणं पुरुषसूक्ते
न प्रत्यृचं षोडशवारं चरुद्रव्येण यक्ष्ये शेषेणाग्निं स्विष्टकृतमित्यादि

त्रा कृतेन मुक्त्वान्वाधानसमिधौ कुर्यात् स्वगृह्योक्तमार्गेण निर्वापणादि विधिना चरुं श्रपयि
त्वाज्यभागांतं हुत्वा च तत्र पुरुषसूक्तेन प्रत्यृचं षोडशाहुतीर्जुहुयात् ॥ नारायणा
येदं न ममेति त्यागः ॥ ततः स्विष्टकृतादि होमं समाप्याग्नेर्देवसमीपे अमुकसगो
त्राया अमुकशर्मणः प्रेताय विष्णुरूपिणे अयं पिंड इति मधुघृतः प्लुतं तिलमिश्रान्
दश पिंडान् दक्षिणाग्रेषु दर्भेषु अवनेजनपूर्वकं दक्षिणामुखः ॥ प्राचीनावी
ती पराचीनेन पाणिना दद्यात् प्रत्यवनेजनं दत्वा पिंडान् गंधादिभिरभ्यर्च्य पत्नी
नेमम गृह्यसे पेनोयं त्वि पितृचेत् लुप्ताभ्यां पिंडानुमंत्र्य पितृसूक्तेन कुशतिलतुल
सीमिश्रितेन शंखोदकेन पिंडान् अभिषिंच्य गंधाद्यैरभ्यर्च्य वाहनांतं कृत्वा नद्यां क्षि
पेत् ॥ न पा दद्यात् ॥ ततः पुरुषसूक्तेन प्रेत नाम गोत्रायामुकं नारायण
रूपं तर्पयामि इति प्रत्यृचं तिलोदकैः षोडशवारं तर्पयेत् ॥ ततः पुरुषाहारपरि
मितं अन्नं विष्णवे ब्रह्मणे शिवाय सायकाय माचय बलिं दद्यात् ॥ तत्र मंत्रः ॥ ब्र

ह्मा विष्णु महादेवाय यमाय सकिंकराय ॥ बलिं गृहीत्वा कुर्वंतु प्रेतस्य च शुभां गतिं ॥
इदं बलिं समर्पयामि ॥ सूक्तप्रतिदेवतं त्रिविधं फलं समर्प्य पायसं मधु गुड शर्क
सर्पिषि निवेदयेत् ॥ एवं दिवा कर्म निर्वर्त्य तस्यां रात्रौ अयुग्मान् पंच सप्त नव वा
ब्राह्मणान् आमंत्र्य पूजितं द्विवसानि धौगीतन्न स्य स्तो अपाठादिना कृतोपवासो जा
गरणं च कुर्यात् ॥ ततः श्वोभूते मध्याह्ने विष्णुरादिनि पुनरभ्यर्च्य दशादि स्मृत्वा
प्राचीनावीती ॥ अत्र नारायणबलौ विहितं श्राद्धं एकोद्दिष्टविधिना हंसपक्षे इति स
मृत्यर्थः ॥ यथा ज्येष्ठ मुख्यमुखाप वेदपत्र सिद्धश्राद्धं श्राद्धं कृत्वा पिंडप्रदाने यत्र वदुल्ले
खनादि कृत्वा ॥ विष्णवे ब्रह्मणे शिवाय यमाय परिवाराय च ॥ विष्णो अयं पिंड
इति प्रयोगेण अमुकं शेषेण दक्षिणासंस्थान् पार्श्वे प्रसंस्थ्यो चतुरः पिंडान् दत्वा
प्रेतनाम गोत्रायाचार्य विष्णुरूपं प्रेतं स्मृत्वा ॥ विष्णुरूपाय प्रेताय पंचमपिंडं दत्वा
प्रत्यवनेजनादि पिंडपूजां कृत्वा चिकेषेणाचम्य दक्षिणाभिः संतोष्य इत्थं मध्ये चै

त्वं गुणं ब्राह्मणं प्रेतस्थाने भोजितं प्रेत बुध्या संस्मरन् वस्त्रा भरणादि रथ्यैरतिशयेन संतोष्याक्ष
य्योदक स्थाने तिलदर्भ तुलसीपूतं शंखोदक धारां दद्यात् ॥ ततस्तै पत्र पाणीभि ब्राह्मणे ह्ल्वा
अमुक गोत्राय प्रेताय विष्णु रूपाय दत्तिलोदकमुपतिष्ठतु इति वाचयित्वा सकुशान्तिलोदकां
जलिं दापयेत् ॥ ततो विसर्जनादि श्राद्धशेषं समाप्य अनेन कर्मणा श्री भगवान् विष्णुरिमं प्रेतं
शुद्धमपापमगाहितं करोत्विति वाचयित्वा स्वयं स्नात्वा गुरुश्राद्धे रापायसादि स्वजनैः सह भुंजी
त। अत्र त्र्यहमाशौचं कार्यमिति परार्कः ॥ नोक्तमिति सरादेः ॥ तेन यथासंभवं व्यवस्था ॥ शुभ
मरणस्यापि इमं विधिं यथासंभवं कृत्वा परलौकिकं कुर्यात् ॥ इति नारायण बलिः ॥ एवं म्लें
च्छहताभिः शस्त्रपतित सुरापानं पतनस्योदः ॥ प्रायश्चित्तानहीनां पतितोदकमात्रं कार्यमिति
केचित् ॥ वस्तुतस्तु तदहीन हेयोर्विचनेन शुपातना दविशेषेणात त्रापि नारायणबलि गया
श्राद्धं च कार्यमिस्त्कं ॥ ॥ अथ पर्णशरदाह विधिः ॥ पतितः पातयेद्वर्षां त्रिविलोपिम लोपि
म लोपि वा ॥ अतस्त्यागः भक्ते योपतितस्य विज्ञानतः ॥ १ ॥ ततः कर्ता शरावादुर्घमन्मयं कुंभं

सिद्धान्नं भक्ष्य भोज्य खादिद्य पुष्प धूप दीप फल वस्त्रा हिरण्यादि सर्व संभारान् गृहीत्वा सर्वैः स
पिंडैः श्रोत्रियो ब्राह्मणेश्च स्वग्रामाद्बहिः रम्यं जलाशयं गच्छेत् ॥ ततो जल समीप शुचौ देशे सर्व सं
भारान् स्थापयित्वा ॥ ततः कृत स्नानं कृत्वा वासः समीपुरि धाय मार्गस्थ पूर्व मानमानयेत् ॥ आ
चम्य प्राणानायम्य देशकालौ स्मृत्वा प्राचीनावीति दक्षिणाभिमुखी भवेत् ॥ अस्मद्वंशोद्भव
न मृतो जीवतो वा वंश कुलापवित्रता जातस्तस्य वंश कुलाद्दूरीकरणार्थं स्व वंश कुलाचार
कर्माधिकार सिद्ध्यर्थं अस्माकं सर्वेषां सपिंडानां पूर्वापर मध्यवर्तिनां गोत्रजानां च नित्य नै
मित्तिक काम्य कर्मानुष्ठान सिध्यर्थं अमुक गोत्रो वस्य अमुक नाम्नो पतितस्य कुलो घ
टा विधिना त्यागमहं करिष्ये ॥ इति संकल्प्य हत्वा ततो मार्गस्थं शिलाभं गोदकेन स्नाप
यित्वा पाद्यांतरेण निधाय पतिता नाम्ना तस्यां शिलायां पतितात्वाहनं कुर्यात् ॥ तत्र मंत्रः ॥
इमं मे रम्मा न मातिष्ठ न मे कथय गोत्रजः ॥ अत्र समच्चं च समातिष्ठ नाहं ते च त्वमेव धुना ॥ इ
ति मंत्रेण कुशा ब्रह्मा तेशया वाह्य ॥ तेन संस्थाप्य पुनरुदकेन स्नाचारारो वद्धयेना इमा

४५

नं क्षिपेत्॥ ततो यथाशक्त्या पुष्पधूपदीपान्नादित सचितस्य दद्यात्॥ ततो नूतनेन रक्तवर्णे
न मृन्मयकुंभे उदकेन पूरयित्वा श्मशानसमीपे धृत्वा तत्र घटे तत्रात्मानं पतितमावाहयेत्॥
तत्र मंत्रः॥ इमं घटं समाविश त्वं मम वंशसमुद्भव॥ गोत्रत्रेधासि जातस्त्वं नाहं सेहत्वमेधुना॥
इति कुंभमावाह्य पंचामृतकुशोदकादि सहिरण्यफलपुष्पाक्षतफलादि तस्मिन्घटमध्ये क्षिपेत्॥
गंधपुष्पधूपाच्छादनान्नफलादि यथाशक्ति प्रपूजयेत् तत्र मंत्रः॥ इमं मन्ने मिदं तोयं गंध
चत्रस्थिरो भव॥ इति॥ ततः शरावद्वयस्थितपाषाणं तत्कुंभे मुखोपरि धृत्वा कर्ता स्वद
क्षिणस्कंधोपरि कुंभं धारयित्वा ग्रामाद्बहिः सीमायां त्रिपथस्थं मार्गं प्राप्य सर्वैः
सपिंडैर्ब्राह्मणैश्च स्वज्ञातिभिः सबांधवैश्च सह गच्छेत्॥ पूर्वनीतपुष्पधूपदीपसिद्धा
न्नादि पदार्थसहान्यैः सपिंडैर्गृहीत्वा यमसूक्तं पठंतो ब्राह्मणाश्चैवेयुः॥ ततः कर्ता ग
त्रिमार्गमध्ये स्वग्रामाभिमुखस्तिष्ठेत्॥ पृष्ठतोनवीक्षमाणः सन्मंत्रमुच्चार्य कुंभं
परिसज्य स्फोटयेत्॥ तत्र मंत्रः॥ मम वंशे समुत्पन्नो वंशगोत्रकुलादपि॥ गोत्रत्रे॥

धोसि जातस्त्वं पतितं पूर्वकर्मणा॥ दुष्कृतेनेह संसारे स्वकर्माचारवर्जितः॥ पतितः पात
कात्स्वात्सर्वकर्मबहिष्कृतः॥ ३॥ तस्मात्सर्वप्रयत्नेन मम वंशसमुद्भव॥ तव सांगं कारि
ष्ये हं प्रीत्या गच्छ यथासुखं॥ ३॥ इमं मंत्रमिदं तोयं गंधं चत्रस्थिरो भव॥ मम गोत्रेन तेगो
त्रं गोत्रत्रे धोधुना भव॥ ४॥ अतः परं त्वमस्माकं वंशगोत्रकुलादिषु॥ संबंधो नास्ति
नास्तीति वदेत्सर्वैः स्तत्मुत्सृजेत्॥ इत्यादि मंत्रान्पठित्वा घटं शरावद्वयं पाषाणसहितं पश्चात्
तः स्कंदाद्धः पातयित्वा उच्चैर्वदेत्॥ अस्य पतितस्य अस्माकं सर्वेषां गोत्रजादीनां
च मम ब्राह्मणस्य च समीपे साक्षित्वेन संबंधो नास्ति संबंधो नास्तीति त्रिरुच्चैः कर्ता गोत्रजा
दयश्च वदेयुः॥ ततो जलमध्ये सर्वैः स्नात्वा कर्ता स्वगोत्रजसहितः स्नात्वैव कर्ता नूत न
मेव धृत्वा परिधानीयवस्त्रं सांगं कृत्वा अन्यद्वस्त्रद्वयं धारयित्वा सर्वैः सह गृहं व्रजेत्॥ इ
ति प्रथमदिनकृत्यं॥ अथ द्वितीयदिने स्नानं ततः कर्ता सपिंडैः सह पुष्पधूपदीपसिद्धान्न

नूतनवस्त्ररक्तकुंभवस्त्रफलहिरण्यादियुक्तांक्षतादिनिग्रही त्वामामादत्त्रिजलाशायंगछेत॥
ततः कर्ता स्नानं स्त्रीवस्त्रद्वयं परिधाय पूर्वसरादिघटउदकपूर्णं वग्रही चाग्निपथमं
गेप्रतिगछेत॥ तत्र पतितस्य नाम्ना पूजा धूपदीपादि सिंदूरान्नकुंभफलादिक तस्मै सर्वं
देयं॥ तत्र मंत्रः॥ इदम् अन्नमिदं तोयं गृहाण त्वम् अस्थिरो मम॥ ममगोत्रत्र तेगोत्रं गोत्र त्रयोध्
नोमम॥ अतः परं तवास्माकं वंशगोत्रकुलादिषु॥ संबंधो नास्ति नास्ती निगृह्य तस्मै यं
पासु स्वं॥ इति मंत्रान्यानि वेदय पनपष्ठ तोनवेस्यभाषः सन्सर्वैः सहजलाये शंगछेत॥
तत्र प्रायश्चित्तं चरेत॥ तद्यथा॥ कर्ता स्नानं कुर्यात॥ आचम्य प्राणानायम्य देशकालौ सं
कीर्त्य केचित् विमते हेमाद्रिप्रयोग मिच्छंति॥ अथ संक्षेप प्रयोगः॥ अद्यपूर्वोच्चारित एवं
गुणविशेषणविशिष्टायां पुण्यतिथौ॥ मम वंशसमुद्भवस्यामुकनाम्नः पति
तस्य कृत्र सह्लग्नासांसर्गिकोद्भवदोषपरिहारार्थं अस्माकं सर्वगोत्रजादीनां च
स्वगोत्रधर्मकुलाचारनिरासनैमित्तिककाम्यादिश्राद्धदानादिकं वा हिरण्यद्वारायथा

शास्त्रानुसारेण शुध्यर्थं प्रायश्चित्तं करिष्ये॥ इति संकल्प्य॥ तदंगत्वेन मादेव चनं क
रिष्ये॥ पुनः स्नानं कुर्यात यथा शास्त्राहिरण्यश्राद्धं कुर्यात॥ आचम्य प्राणाया
म्य देशकालौ संस्मृत्वा॥ अद्य हे त्याद्यमुकपतितस्य संस्लग्नोद्भव दोषपरिहारा
र्थं स्वधर्माचरणसिध्यर्थं अस्य पतितस्य क्रियाधिकारसिध्यर्थं हिरण्यश्रा
द्धं करिष्ये॥ इति संकल्प्य॥ यथाविधि हिरण्यश्राद्धं कुर्यात॥ ततो गृहं गछेत॥ इति
द्वितीय दिनकृत्यं॥ अथ तृतीय दिनकृत्यं॥ ततः पात्रशाविध्यर्थं पात्रशोसमिधा
दिसर्वोपस्कारसहितं सभाराच्छदीत्वा॥ कर्ता षट्भिः ब्राह्मणैः सह अन्यं परत्यज
ताशायं गछेत॥ तत्र यथाविधिनारम्यं जलंतं शायं गछेत॥ रूपात्वर्थं पात्रशा
विधिः कुर्यात॥ ततो विधिवत्पतितस्य और्ध्वदेहिकक्रियाकार्या इति घट स्फोटवि
धिः समाप्तः॥ अथ सर्पहतेनागबलिं कार्यं॥ तत्संवत्सरे भाद्रपदशुक्लपंचमीमारभ्य
प्रत्यमासशुक्लपंचम्यामुपवासः यथा चतुर्थ्यां एककालं पंचम्यां नक्तं॥ दारुमयंम

योजकपयस्मे त्वं कामक्रामाय च यं संराज्यजामहे तपस्यश्वं कामं दत्वा थेदं घ्नं पिवस्वाहा
कामायपरस्वं न मम ॥ ततस्त्यजति स्त्रोव्याहतिः स्विष्टकृद्यार्क शारवायाश्रुत चारिणः ॥ स्व
शारवाकृप्रकारेणतु पंड अग्निना दहेदिति ॥ श्रुतचारिणा विधानं ॥ प्रेतत्वे माधिगम्याथ
कुर्मोरयंति यो ॥ नश्रेतत्व विनाशोयं त्रिपिंडिविधिरुच्यते ॥ अथ त्रिपिंडिविधिः ॥ ता
क्ष्य उवाच ॥ देवदेव जगन्नाथ लोकानां हितकाम्यया ॥ और्ध्वदेहिक मारव्यातं प्रेतमोक्ष
॥५८॥ स्यकारणं ॥ नारायणबलिः प्रोक्तो नथा पुत्तलिको विधिः ॥ विधिना च दधानां च
विदेशमरणे सति ॥ वक्तव्यं न कृपास्याते तथा दुर्मरणे सति ॥ तथापि जंतवः के ॥५८॥
चिदुर्गतिसमुपास्थिताः ॥ स्वकुलेषु प्रजानां च पिंडं कुर्वंति दारुणं ॥ न तेषां विप
तिस्या मिरुघ्नणा यो पितधादया ॥ संततिप्रतिबंध त्रिघ्रस्यपसी ॥ निदारुणं ॥
कृपायस्वप्रसादेन तेषां मोक्षः कथं भवेत् ॥ किं कार्यं तत्कुलोद्भवैः पुत्रैर्वा पुरु
षानम ॥ यागमननमशक्तोयेत पाव्र षषभमोक्षणे ॥ केंकुर्युस्ते जगन्नाथ एतन्मे
नसंतो वदन् ॥ श्रीभगवानुवाच ॥ शृणु वत्स प्रवक्ष्यामि यत्पृष्टोस्मि त्वयानघ ॥

प्रेतमोक्षकरं कर्म लोकानां सुखदायकं ॥ यस्य स्मरणमात्रेण प्रेतः पिंडान जायते ॥
करिष्यामिति संकल्पं येन मोक्षमवाप्नुयात् ॥ यन्न कस्यचिदाख्यातं गोपनीयं मि
दं मम ॥ रहस्यं परमं तस्य सत्यं सत्यं खगेश्वर ॥ पिंडत्रयात्मकं कर्म तद्वक्ष्यामि सांप्रतं ॥
प्रेतानां हितजनकं लोकानां सुखदायकं ॥ तार्क्ष्य उवाच ॥ भगवन्को विधिस्तत्र किं दानं गो
त्रपुज्यते ॥ तत्संकल्पयेद्विद्वान् गोमयेनोपलेपयेत् ॥ तत्र पिंडत्रयं कुर्यात् प्रेतानुद्दि
मयं स्मर ॥ आदौ संपूजयेद्विद्वान् कुंभमुपचारैस्तु षोडशैः ॥ आद्यो यवमयः पिंडो द्वितीयो
व्रीहिसंभवः ॥ तृतीयश्च तिलैः कार्यो एवं पिंडत्रयं खग ॥ यवादिपिष्टप्रभवं
ह्येको वि कुंभमयं स्मरेत् ॥ ततो निमंत्रयेद्विद्वान्ब्राह्मणान् दंभवर्जितान् ॥ सदा
चारान्पुत्रवंतो वेदवेदांगपारगान् ॥ उपवेश्य द्विजांस्तत्र पाणिनापम्युयत्नतः ॥
श्राद्धं विधिविधानेस्त्रि त्रिभेदितं ॥ सप्तव्याहृतिमंत्रेण प्रोक्षयेत्प्रोक्षयेदुप
हारकं ॥ मधुवाता इति ऋचं जप्त्वा त्रिजपन्मधुमध्विति ॥ दिशो कालो ततस्मरेत्
करिष्ये इति कल्पयेत् ॥ पिंडनैरास्तेथ संकल्पं कुर्यादि सर्वथा ॥ प्रेतवैरोपरथं ति

॥५८॥

श्लोकत्रयविचक्षणाः॥ पितृवंशे मृता पि च मातृवंशे तथैव च॥ गुरुश्वशुरबंधूनां ये चान्ये बां
धवास्मृताः॥१॥ ये मे कुले लुप्तपिंडाः पुत्रदाराविवर्जिताः॥ क्रियालोपगता ये च जात्यंधाः
पंगवास्तथा॥२॥ विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम॥ धर्मपिंडप्रदास्यामि ह्य
क्षय्यमुपतिष्ठतु॥३॥ अथ नेज्य ततः पश्चात्पिंडद्रव्यं जपेन्मधु॥ मधुमधुरुत्तं॥ पि
उं दद्यात्प्रयत्नेन मधुत्रयसमन्वितान्॥ मधुत्रयदत्तिमधुघृतं॥ कुशानास्तीर्य
सर्वत्र तिलान्प्रक्षिपेद्बुधः॥ प्रथमं पीडमादाय पितृवंशेनुपूर्वं चरन् पठि
त्वा समगतांस्त्रिन्मंत्रानविचक्षणाः॥ पिंडं तिलयुतं कृत्वा दद्यात्प्रेत त्वमुत्कृये॥
इमं यवमयं पिंडं मधुसर्पिःसमन्वितं॥ ददामि तस्मै प्रेताय यं पिंडं कुरुत मम॥
एके चिस्वरूपेणावर्तंते पितरो मम॥ एव पिंडप्रदानेन तत्पिं गच्छतु शाश्वतिं॥
एके च दिवि तिष्ठंति प्रेता सात्विकरूपिणः॥ सात्विकाः पिंडदानेन तत्पिं गच्छंतिते
क्षयां॥ इति षड्गिरकेः पिंडोदेयः॥ ततः पितृवंशाद्वितिपठित्वा च नेज्य॥ मंत्रो हि मम
पिंडं मधुत्रयसमन्वितं मुत्कृये प्रदास्यामि पिंडायेकुर्वंते मम॥ ये के चिद्वापुर

॥५८॥

वर्तंते पितरो मम॥ तंदुलैः पिंडदानेन अंजं तु गतिमुत्तमां॥ अंतरिक्षे च ये केचिद्राजसा वा
युरूपिणः॥ राजसाः पिंडदानेन तृप्तंतुत्तमुदाहृता॥ इति षड्गिः॥ द्वितीयः पुनः पितृवं
शादिति॥ चिन्पठित्वावेक्ष्य॥ इमं तिलमयं पिंडं सर्पिषा मधुनायुतं॥ तेभ्यो ददामि ये पिं
डमस्मत्कुले कुर्वते सदा॥ एके चित्तामसा प्रेता भूमौ तिष्ठंति सर्वदा॥ तिलपिंडप्रदानेन
गतिं गच्छंतु ते ध्रुवं॥ तमोरूपाश्च ये केचिद्वर्तंते पितरो मम॥ पिण्या सिंडदानेन तृप्त
तु च ध्रुधार्दिताः॥ इति षड्गिः श्लोकैः॥ तृतीयाः॥ त्रीन्पिंडान्विधिवद्दत्वा पुनर्देवाव
नेजनं॥ नमो वः इति कल्पोक्तमंत्रजाप्यं नरैस्ततः॥ सूत्राणि निक्षिपेत्तत्तु पिंडेषु पि
उं विचक्षणाः॥ गंधपुष्पं तथा धूपं दीपं चैव प्रदापयेत्॥ नैवेद्यं चैव तोयं दद्यात्ततः पिंडे
प्रदापयेत्॥ पातुलिविसृजं बुरेउनतिर्भिर्यथाक्रमं॥ सात्विकादिक्रमेण॥ ततः पिं
डप्रदानांतं वै कुर्वतर्पणमाचरेत्॥ तर्पणं तु शंखोदकेन॥ वेदोक्तैर्विस्तृतैर्मंत्रैस्तथा
पौराणिकैः शुभैः॥ तर्पणस्यावसाने तु ब्राह्मणान्स्वशक्तितः चयेत्॥ भोजनं चुततोद
द्यात्पायसं मधुनायुतं माषान्नं कृसरान्नं च मिष्टान्नं च प्रकल्पयेत्॥ तैश्चैव पूजये

शिप्रान् ॥ दक्षिणाभिश्च तोषयेत् ॥ सात्विकेभ्यो ददेद्द्रव्यं राजसेभ्य: कमंडलुं ॥ उपानं
त्रिजनं दद्यात्तामसेभ्य: खगेश्वर ॥ ततः सान्प्रार्थयेद्विप्रान्सुतृप्तिः शांतिकारकान् ॥
प्रार्थितास्ते प्रयुंछेयु: शांतिरोगं च मेश्वरं ॥ मंत्रस्तु ॥ दिव्यंतरिक्षभूमिष्ठा सात्विका
राजसास्तथा प्रेतोर्ध्वे तामसा ये न्ये शांतिं यच्छंतु तर्पिता: ॥ एवं कृते सुगति श्रेष्ठ
पिंडानं स्यांति तत्कुले ॥ आपुछ्य वर्द्धते नित्यं पुत्रपौत्रादिकं तथा ॥ नाधिकं तु न्यु
कर्त्तव्यं कृते कार्यं न सिध्यति ॥ वित्तशाठ्यं न कुर्वीत सत्यमेतन्मयोदितं ॥ १५० ॥
श्रीभगवानुवाच ॥ एतत्ते सर्वमाख्यातं पुत्र श्रेष्टोमित्वया खगवत्कृत्स्ना
शांतु सदा भक्त्याद्यघोरस्था नेद्धं जोम्यपदं ॥ इति त्रिपिंडिविधानं ॥ वैद्यनाथे
नैविनिर्मितोयं पद्धतिबोपनोन्याद्विपेरतश्च काशिणवैश्रागखकेकौपि
भूत्गुत्नचवंगेषष्ठ्यां च वायोर्निगरैः समाप्तः ॥ इति प्रेतकाशिका समाप्ता ॥